र्मपुराणे यस्त्वदत्वार्जितं कृत्वा नार्चयेद्ब्राह्मणान्स्वयं तान् सर्वस्वमुपहृत्यैनं राजा राष्ट्रात्प्रवासयेत् । ब्रह्मपुराणे सदाचारा
कुलीनाश्च नृपवंतः प्रियंवदाः वाङ्मात्रेणाप्यमेधायाचमाना नापरागृहान् दृश्यंते दुःखिनः सर्वप्राणिनः सर्वदा दुःखिते यद-
न्नदानाज्जायंते परभाग्योपजीविनः २ व्यासः अन्नं हृदयमभ्यस्तं नास्ति नास्तीति यत्पुरा न दिदं देहि देहीति विपरीतमुपस्थितं । स्कं-
दपुराणे बाधयंति न याचं ते देहीति कृपणं जनाः अवश्यं यमद्वारं न समाश्नुते देवं भयानपि । एकेनमिष्टनाथमन्नाद्यमेनोपतितिष्ठ

२

भिरक्षणं सत्पात्रप्रतिपत्तिस्सर्वपापेषुपठ्यते । कूर्मपुराणात् दानधर्मात्परोधर्मोभूतानांनेहविद्यते तस्माद्विप्रा
यदातव्यंश्रोत्रियायद्विजातिभिः द्विजातिभिरित्युपलक्षणंदानस्यसर्वसाधारणत्वात् महाभारते श्वपाकशतलब्धा
मप्राणिभ्योपिगरीयसः गतिरेकैवविन्नस्यदानमन्याविपत्तयः । ब्राह्मणायाभिरूपाययोदद्यादर्थमार्थिने निद
धातिनिधिंश्रेष्ठंपारलौकिकमात्मनः २ कूर्मपुराणे नहिदानात्परतरमन्यदस्तीतिमेमतिः धनधान्यवतः किंचि
द्दहार्थराजतस्करैः । वह्निपु० तपःस्वेवतीर्थेषुव्रतेषुनियमेषुचः सम्यक्चीर्णेषुविप्रर्षे पश्चाद्दानंसमाचरेत् यस्यवि
त्तंनदानायनोपभोगायदेहिनाम् नापिकीर्त्यैनधर्मायतस्यवित्तंनिरर्थकम् तस्माद्वित्तंसमासाद्यदैवाद्वापौरुषादथ द
द्यात्सम्यक्द्विजातिभ्यः कीर्तनानिचकारयेत् व्यासः श्रद्धयादनिपात्येतमहत्त्वमवेग्रहनतथा मार्जनंदर्पणस्येवयःकरो
तिदिनेदिने । अदातापुरुषस्त्यागीधनंसंत्यज्यगच्छति दातारंकृपणंमन्येमृतोप्यर्थंनमुंचति २ मनुः दानधर्मंनिषेवे
तनित्यमैष्टिकपौर्तिकं परितुष्टेनभावेनपात्रमासाद्यशक्तितः । इष्टंयज्ञेषुयद्धीयतेदक्षिणादितदैष्टिकं वह्निवेदिषुयद्दा
नंतत्पौर्तिकं यत्किंचिदपिदातव्यंयाचितेनानसूयया उत्पत्स्यतेहितत्पात्रंयत्तारयतिसर्वतः २ स्वर्गायुर्भूतिकामेनतथा
पापप्रशान्तये मुमुक्षुणाचदातव्यंब्राह्मणेभ्यस्तथान्वहं २ विष्णुधर्मे नददातिचदानानिमोघंतस्यधनार्जनं. उभयोर्यो
स्यायदातव्यंब्राह्मणेभ्योयुधिष्ठिर । वह्निपुराणे अन्नंमूलंफलंशाकमुदपात्रंतपोधनाः दानेविभवतोदद्यान्नरः स्वर्गी

हे मा
दि

यणं चरेत् ५ शूद्रान्नं शूद्रसंकल्पं पाचितं ब्राह्मणे समति भुक्तो तेन ककेर्योनिर्दातानोक्ता च पाचकः ६ सूता
कान्नं नवश्राद्धं मासिकान्नं तथैव च हस्तत्यक्तद्विजस्यान्नं भुक्त्वा कृच्छ्रं समाचरेत् हस्तेलोभपात्रवलेपनो लोकः ।
स्त्रीजितो यस्तु तन्नपतत्सु अदातानां च माहिषः पुनर्भूः पतिवेत्ता च षडेता हव्यकव्यसूताः ७ भानुवारे दिवारा
त्रौ ग्रहणे च तथैव च धात्रीफलं नरः खादन्नलक्ष्मीको भवेत्सदा ८ रात्रौ च भोजने काले यदि दीपो विनश्यति
ति तदन्नं पाणिना स्पृष्ट्वा सावित्रीं मनसा स्मरेत् पुनर्दीपं ततो लब्ध्वा शेषं भुंजीत कामतः अन्यदन्नं न भोक्तव्य
भुक्त्वा चान्द्रायणं चरेत् ११ अमावास्यापितृश्राद्धे संक्रान्तौ पारणे रवौ पराण्णं नैव भोक्तव्यं यस्यान्नं तस्य तत्फलं १२
वत्सरान्तिमासे सामे परान्नं ये तु भुंजन्ति तस्य मासकृतं पुण्यं दातारमधिगच्छति १३ भूताष्टम्यां दिवा भुक्त्वा
रात्रौ भुक्त्वा तु पर्वणि पक्षद्वये दिवारात्रौ भुक्त्वा चान्द्रायणं चरेत् १४ अथ दासनापितगोपालकुलमि
त्राणां सत्तराणि हारीतः शूद्रकग्रामनियममाहात्म्येषु प्रशस्तो ॥ ॥

यैवविप्रः सम्यगुपस्पृशेत् एकपंक्तिस्थितानां सर्वेषां भोजने यदि समामस्यन्यर्थः ग्रामस्य नियममाहापस्तंबः अष्टौ
ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारिणः १ पुलस्त्यः भोजनेन तृप्तिः स्या
द्वेऊर्ध्वान्मात्रातः कथ्यवनः अन्यत्र दधिसक्काज्यपललक्षीरमध्वपः १ भोजनानन्तरं देवलः भुक्तोच्छिष्टं समादा
य सर्वेभ्यः किंचिद्दद्यात् सर्वेभ्यः किंचिद्दद्याच्च मन् उच्छिष्टभागधेयेभ्यः सोदकं निर्वपेद्भुवि १ मंत्रमंत्रः रौरवे पु
ण्यनिलये पद्मार्बुदनिवासिनां अर्थिनां सर्वभूतानामक्षय्यमुपतिष्ठतु २ व्यास हस्तं प्रक्षाल्य गंडूषं यः पिबेन्माप
मोहितः तद्दैवं चैव पित्र्यं च आत्मानं चैव पातयेत् गंडूषपादशौचं च भाजनेषु न कारयेत् उदकं भूमिमादाय मात्र
मेव पुनः पुनः १ आचम्य च पुनः पश्चात् समाचारात् त्रिणादिना दंतलग्नविशुद्ध्यर्थं कर्तव्यं दंतशोधनं १ व्यास आयो
गोपस्थविस्तावययावन्मात्रमंगुलैः तत् उद्धृते मप्य विस्ताव यावत्रोम्मस्तुतेमही १ तांबूलेविः अलाय द्विजवर्येभ्यस्ता
म्बूलं च वर्जयेत् यः अश्वभक्ता भक्ष्यं अलाबुं वर्तुलाकारं श्वेतं हंताकमेव च कलिंगमसिताकारं भक्षकाचाण्डायणं।
चरेत् १ क्षारं लवणसंयुक्तं उच्छिष्टं चैव यत् कृतं शणपुष्पं राजपुष्पं भु [illegible] मभोजनं २ पानीयं पायसं भिक्षा
तैललवणमेव च हस्तदत्तं न गृह्णीयात् गृह्णीतो नानरकं व्रजेत् ३ आविकाछ्येवयस्तीरम्मगाणां वनचारिणां क्षारं
च गार्दभं चैव भक्षकाकृच्छ्रं समाचरेत् ४ प्रवक्ष्यामि यथोक्तानि अन्नानि नियोजितं दशाहाभ्यंतरे क्षीरं भक्षकाचान्द्रा

म. पा.
२६३

दशवार्षिकादिप्रायश्चित्तं कुर्वन्नन्तरा म्रियते तदा शुद्ध एवेत्याह. यमः प्रायश्चित्ते व्यवसिते कर्त्ता यदि विपद्यते ॥
शुद्धस्तदहरेवासाविह लोके परत्र चेति अव्यवसिते कर्त्तुमुपक्रान्ते अंगिराः यो यदर्थं चरे[illegible] इमम प्राप्य म्रियेत
तेनैवं तत्सतत्त्वेष फलं प्रेत्य प्राप्नुयात् मनुरब्रवीत् यस्तु नरापत्त[illegible]क्रमम् विप्रहाग्रस्य पेकुटिं कृत्वा
वापतः प्रावशिरोध्वजः प्राणीयदूत्र यो नास्तु परिज्ञात्वा[illegible]दित्सुपक्रमत्य गुरुं हत्वा श्रोत्रियं वा प
न देवव्रत मोक्तुमादुष्कृतात्सा स्त्रैन्नास्मिंल्लोके प्रत्यापन्निर्विद्यते इति तन्मातापित्राचार्यादिविषयं भविष्य
पुराणे मातरं पितरं हत्वा सोदर्यं भ्रातरं तथा गुरुं हत्वा श्रोत्रियं चेत्सुपक्रोस्यासैव प्रायश्चित्तविधानात्
प्राणीयदूतः प्राणाः तन्मयवस्त्रैकदेशः उक्तपादोक्तासात् अत्राशक्तस्य प्रावः समाप्य द्वाद
शसंवत्सरात् षट् त्रीन् सार्धसंवत्सरं च व्रतानि त्र्यादिशेत् तेषामंते गोसहस्रं तदर्धं वा तस्यार्धं
मतर्धं वा तस्यार्धमतर्धं च दद्यादिति सर्वेषां वर्णानां मानुहदेर्वोणोति एतदेव व्रतमोनसादोक्तासास्त्रे
द्विमत्रासमर्थो द्वादशवार्षिकव्रतचर्या[illegible]नंतरं गोसहस्रदानं अत्राप्यशक्तस्य यद्वार्षिकव्रतचर्यानंतरं पंचशतं

२६३

तिकर्मभ्योहानिः पतनमिति वचनात्संध्यायाअपिहानिर्भवत्विति चेत् मैवं द्विजातिकर्महानिवचनस्यत्र
तच्चर्यानेनगाभूतेद्विजकर्महानि विषयत्वेनाप्युपपत्तेः अन्यथादत्तवचनस्यमनुप्रोक्तसंकोचापत्ते संध्या
याश्चप्रत्याख्यापादनद्वारेण सर्वकर्मणामप्येव एवंमन्येपिधर्माः स्मृत्यन्तरोक्ताद्रष्टव्याः तेषांधर्माणांयत्र
विरोधस्तत्रविकल्पः यत्रचविरोधाभावस्तत्रसमुच्चय इतिव्यवस्था प्रतिनिमित्तंनैमित्तिकमावर्तेत
मावर्तेत इतिन्याये नद्वित्रिब्राह्मणवधेप्रायश्चित्तमावृत्तंभवति तथाचमनुः विधेःप्राथमिकादस्मा
द्वितीयेद्विगुणंचरेत् तृतीयेत्रिगुणंप्रोक्तंचतुर्थेनास्तिनिष्कृतिः चतुर्थेतिअयमभिप्रायः महापा
तकप्रायश्चित्तगुरुत्वाच्चतुर्थप्रायश्चित्ताचरणेकालाभावः आयुषअल्पत्वेन तस्मात्प्रायश्चित्ताभावो
नतद्रूपतोभावः अथवाचतुर्थेनिष्कृत्यभाववचनेत्रासजननार्थं [illegible]नेतानिष्कृतिरेवनास्ति[illegible]यापेन
कर्तव्यमित्यर्थः एवंचमहापातकव्यतिरिक्तपापेषुचतुराद्यावृत्ता[illegible]पिप्रायश्चित्तंकर्तव्यमेव एतच्च
द्वादशवार्षिकव्रतमकामतोब्राह्मणमात्रवधे तथाचभविष्यत्पुराणे तत्रसामान्यतोहत्वाब्राह्मणं[illegible]
सत्तम प्रायश्चित्तंतुवैकृत्वाविधिवद्वादशात्मकम् प्राप्नोतिशुद्धिंजीवन्वैस्वर्गंचप्रजनेसहेति एवंह्यो

तत्रयःशृंगावंहन्यात्सहर्षंदद्यात्यः स्त्रीगवीमवेहतमितिगंजर्यां गर्भघातिनीगोर्वहत एवंविक्तविषयएवका
मकारेकात्यायनोक्तंत्रैवार्षिकंद्रष्टव्यम् गोघ्नस्तच्चर्मसंवीतोवसेन्मासंयवा पुनः गाश्चानुगच्छेत्ससततंमौ
नीवीरासनादिभिः वर्षशीतातपक्लेशवह्निपंकभयादितः मोचयेत्सर्वयत्नेनहृज्जयेद्वत्सरैस्त्रिभिरिति
यत्तुयमेनमानवेनिकर्तव्यानासहितंमासद्वयव्रतंगोसहस्रदानयुतमुक्तंयच्चगोतमेनत्रैवार्षिकंगो
शतदानसहितमुक्तंयत्तुकात्यायनोक्तंत्रैवार्षिकं इदंत्रितयमपिशिष्टांत्यंतदुर्गतब्राह्मणसंबंधिक
मंगिभूतवक्तृत्तीरकपिलत्वादिगुणोपेतबालवत्सदुर्भिक्षकुटुंबधारभूतसानुबंधवज्रादिपीडाति
शयपदप्रहारगोहननकर्तृरतिडः शीलस्यदानेनपः समुच्चितप्रायश्चित्तमितिस्मृतिमंजर्यांमिताक्षरा
यांच एवमन्यान्यपिप्रायश्चित्तानिदर्शितानिजातिशक्तिगुणाद्यपेक्षयायोज्यानि एवंविक्राधिप्रायश्चि
त्तविषयेपूर्वोक्तव्रतानिकृत्वा[illegible]दिसाधनताडनविशेषहननप्रयुक्तप्रायश्चित्तान्तराण्यपिकार्याणि
स्मृतेनैवाभिप्रायेणयमः काष्ठलोष्टाश्मभिर्गावः शस्त्रैर्वाहनितायदि प्रायश्चित्तंकथंतत्रशस्त्रेशस्त्रे
विधीयते काष्ठेसांतापनंकुर्यात्प्राजापत्यंतुलोष्टके तप्तकृच्छ्रंतुपाषाणेशस्त्रेचाप्यतिकृच्छ्रकमिति त

ध्रियमाणेनेह षष्ठे एकादशगोदानसामर्थ्याभावेन हि गां प्रमापितगोवधः सामर्थ्यं विहितं तां अस्मिन्वचने मासद्वयमि
त्येव मासत्रयमित्युक्तं तच्च ब्राह्मणसंबंधिनातानाहरणपादिगुणयुक्तगोवधे गोमती विद्यायमेन दर्शिता गोम
तीं कीर्तयिष्यामि सर्वपापप्रणाशिनीम् तां तु मे गदतो विप्राः शृणुध्वं सुसमाहिताः गावः सुरभयो नित्यं गा
वो गुग्गुलगंधिकाः गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत् अन्नमेव परं गावो गोदानां हविरुत्तमम्
पावनं सर्वभूतानां रक्षंति च वहंति च हविषा मंत्रपूतेन तर्पयंत्यमरान्दिवि ऋषीणामग्निहोत्रेषु गावो हो
मप्रयोजिकाः सर्वेषामेव भूतानां गावः शरणमुत्तमम् गावः परं पवित्रं च गावो मंगलमुत्तमम् गावः
स्वर्गस्य सोपानं गावो धन्याः सनातनाः नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च नमो ब्रह्मसुताभ्यश्च पवि
त्राभ्यो नमो नमः ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधाकृतं एकत्र मंत्रास्तिष्ठंति हविरेकत्र तिष्ठतीति गोमती
विद्या सवनस्थश्रोत्रियगोवधे अज्ञानकृते हारीतः गोघ्नस्तच्चर्मार्धबालेय परिधाय तत्तुपक्रम्यमानवीमिति
कर्तव्यतामभिधायह षष्ठे एकादशायाश्च दत्वा त्रयोदशे मासि पूतो भवतीति अस्मिन्नेव विषये गां चेद्धन्यात्तस्या
श्चर्मार्धेण परिवेष्टितः षण्मासान्कृच्छ्रं तप्तकृच्छ्रं वा तिष्ठेद् वृषभवेहतो दद्यात् मिति विस्पष्टोत्तमसियाज्य

तां कीर्तयि
ष्यामि स
र्वपापप्रणाशि
नीम् २

म० पा० २६९

दिवसेषुभिक्षाचरणस्यग्राह्या एतच्चभैक्षमित्यंववन्यैर्जीवनाशक्तस्य तथाचसएवभिक्षायैप्रविशेद्ग्रामंसेववन्यैर्य
दिनजीवतीति ॥मनुः कृतवापनोवानिवसेद्ग्रामान्तरेगोव्रजेपिवा आश्रमेवृक्षमूलेवासर्वभूतहितेरतः
कृतवापनोवेतिवाशब्दोविकल्पद्योतनार्थः ब्रह्महाद्वादशाब्दानिवालवासाध्वजीजटीमौनीमौंजी
दण्डकमण्डलुःतिसंवर्त्तस्मरणात् शंखः स्थानवीरासनीमौनीमौंजीदण्डकमण्डलुः भिक्षाग्नि
कार्य्यकूष्माण्डीभिःसदाजपइतिकूष्माण्डीमन्त्रैरग्निकार्य्यंकुर्य्यादित्यर्थः गौतमः खट्वांगकपालि
द्वादशसंवत्सरान् ब्रह्मचारीभिक्षायैग्रामंप्रविशेत्कर्माचक्षाणः पथोपक्रमेत्सन्दर्शनादार्यस्य
स्थानासनाभ्यांविहरन्सवनेषूदकस्पर्शीशुद्ध्येदिति ब्रह्मचारिशब्देनमांसगंधमाल्यदिवास्वप्नांजना
भ्यंजनोपानच्छत्रकामक्रोधलोभमोहहर्षनृत्यगीतपरिवादनभयानीत्यादीनिगृह्यन्ते सवनेषूदक
स्पर्शीत्यनेनस्नानविधानात्तदंगभूतमन्त्रादीनामपिप्राप्तिःतथासंध्यापिकर्त्तव्याः अतएवदक्षः
संध्याहीनोऽशुचिर्नित्यमनर्हःसर्वकर्मसु यत्किंचित्कुरुतेकर्मनतस्यफलभाग्भवेत् ननु द्विजाः

२६९

ग्रारोप्यतेनदण्डेनध्वजवान् भिक्षाशीस्वकर्मख्यापयन् द्वादशाब्दानिव्रतंचरेत् शातातपः ब्राह्मणो
ब्राह्मणंहत्वातस्यैवशिरःकपालमादायतीर्थान्यनुसंचरेदिति. मनुः ब्रह्महाद्वादशाब्दानिकुटींकृ
त्वावनेवसेत् भिक्षाश्यात्मविशुद्ध्यर्थंकृत्वाशवशिरोध्वजमिति एतदुभयंपाणिनाग्राह्यमित्याह-
गौतमः खट्वाङ्गकपालपाणिरिति खट्वाङ्गंचात्रशवावनिर्हरणार्थोनदंगमेवध्वजशब्देनविवक्षित
मिति अपरार्के खट्वाङ्गशब्देनदण्डारोपितशिरःकपालात्मकोध्वजोगृह्यते तत्पुनःखट्वाङ्गेकदे
शः महोदः खट्वाङ्गमित्यादौतत्रैवप्रसिद्धिरितिविज्ञानेश्वरे एतत्कपालधारणंचिह्नार्थंनतुभि
क्षार्थं अपरमेनभिक्षार्थंपात्रान्तरविधानात् लोहितकेनखण्डशरावेणग्राममभिक्षार्थंप्रविशेदिति
वसिष्ठः सप्तागाराण्यसंकल्पितानिचरेद्भैक्षमिति अत्रमिष्टलभ्यतेनात्रैत्येवमचिंतितानीत्यर्थः
इयंभिक्षाएककालएव तथाचसएव एककालाहारइति तच्चभैक्षंवर्णचतुष्टयएव तदाहसं
वर्तः चातुर्वर्ण्यंचरेद्भैक्षंखट्वाङ्गीसंयतःपुमान् चातुर्वर्ण्यमलाभेतुवर्णागृहेषुभिक्षांसंभवेदान्त्रिया

दोषप्रतिपादकवचनानि स्वरूपतो दोषं प्रतिपादयन्ति दोषाभावप्रतिपादकानि अना[illegible]ततायिब्राह्मणादिवधे
यावान्दोषः तावान्न किन्तु ततोऽल्प इति संपूर्णदोषाभावं प्रतिपादयन्तीति न विरोधः ॥ अथ महापातकोद्देशः
मनुः ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमम् महान्ति पातकान्याहुः संयोगं चैव तैः सह च्यवनः ब्रह्म
हत्या सुरापानं गुरुतल्पं ब्राह्मणसुवर्णहरणं द्विजानां महापातकान्यभिधायासाध्यारापेनाह स ए
व अदेशदण्डेन ब्रह्महत्या गुरुभार्यारोहणं युधि पलायनं क्षत्रियस्य मानतुलान्यत्वं वैश्यस्य मांस
विक्रयो ब्रह्महत्या ब्राह्मणीगमनं कपिलापानं शूद्रस्य तत्समपत्कान्यचमामिति कपिलापानेऽपि
ल्लाद्युपपातकमेतानि पातयन्तीति पातकानि महत्त्वेन गुरुत्वं योधयेत अथ ब्रह्महत्याप्रायश्चित्तं ॥
याज्ञवल्क्यः शिरः कपाली ध्वजवान् भिक्षाशी कर्म वेदयन् ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमा
प्नुयात् साक्षाद्यो ब्राह्मणो ब्राह्मणं व्यापादयति स स्वव्यापादितब्राह्मणशिरः कपालैकदेशेन तद
भावे देवोमृतब्राह्मणशिरःकपालैकदेशेन हस्तेन शिरःकपाली तथा कपालैकदेशानां रखण्डाग्र

चसंगरे स्त्रीविप्राभ्युपपत्तौचघ्नन्धर्मेणनदुष्यति कालकारितेविप्लवेराजाभावकालजनिते यद्वद्
द्विजानामपहारेस्वतिनात्परित्राणेसंगरे दैवादापतितेयुद्धे अभ्युपपत्तौरक्षा धर्मेणाकूटशस्त्रेण
कूटप्रकारेणच गुरुंवाबालवृद्धौवाब्राह्मणंवावहुश्रुतम् आततायिनमायांतंहन्यादेवाविचारयन्
वसिष्ठः अग्निदोगरदश्चैवशस्त्रपाणिर्धनापहृत् क्षेत्रदारहरश्चैवषडेतेआततायिनः अत्रायम
भिप्रायः आततायिनोगुर्वादयोपिहंतव्याः किमुतान्यइतिकैमुतिकन्यायेन गुर्वादिव्यतिरिक्ता
ततायिवधेदोषाभावः प्रतिपाद्यते नतुगुर्वादिहननंविधीयतेइति ब्राह्मणोनहंतव्यइतिब्राह्मणा
त्वाजात्याधारव्यक्तिहनननिषेधात् अतएवमनुः आततायिन्यदोषोन्यत्रगोब्राह्मणेभ्यइति अतो
ब्राह्मणेनापूर्वविस्थलेआततायिब्राह्मणाद्युद्देशेनशस्त्रग्रहणंत्रासजननार्थमात्मरक्षणार्थंचेतिवि
वेकः अथवाआततायिनमित्यादिषुहननंनविधीयतेहननेरागप्राप्तत्वात् अपितुदोषाभावःप्रति
पाद्यते दोषाभावोपिनसर्वात्मना तथासत्यन्यत्रगोब्राह्मणेभ्यइत्यादिवचनविरोधात् तस्मादेवंव्यवस्था

म. पा.
२६८

क्षौंद्विगुणव्रतम् तथा दक्षिणा चेति विवेकः अत्र सर्वत्र वर्णविशेषानुपादानेन वपनविधानात्सर्वेषामपि
द्वादशरात्रादिसाध्यप्रायश्चित्ताधिकारिणां वपनं भवति सर्वेषु कृच्छ्राणां व्रतरूपाणीत्यादि वपनविधा
यकवाक्ये श्रुतिरूपपदकृच्छ्रशब्दोपादानात् तस्य च प्राजापत्यपरत्वात् तथा च पैठीनसिः द्वादशा
हे संपूर्णे वपनं [illegible]ति संपूर्णे इति वचनाद्द्वादशाहान्न्यूने न भवति यत्र द्विरात्रत्रिरात्रादिसाध्यकृच्छ्राणा
मावृत्त्या द्वादशरात्रसमता तत्रापि वपनमस्त्येव एतच्च वपनमक्षिरोमशिखावर्जं भवति अक्षिरोम
शिखावर्जमिति वसिष्ठेनाभिधानात् यत्र तु मुण्ड इत्यादिपदैर्विशेषो विधीयते तत्र तथैव वपनं का
र्यमिति निर्णयः एतच्च व्रतमापत्क्रान्ते परिसमापनीयं तथा च छागलेयः सर्वव्रतेन गृहीत्वा तु नाच
रेत्कामं मोहितः जीवन् भवति चाण्डालो मृतः श्वा चैव जायते इति अथ ब्रह्महत्यादिप्रायश्चित्तानां [illegible]
[illegible]प्रथमं किं क्षत्रियकृतोपयोगि विचार्यते मनुः शास्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते द्विजातीनां च
वर्णानां विप्लवे कालकारिते आत्मनश्च परित्राणे दक्षिणानां च संगरे आत्मनश्च परित्राणे दक्षिणानां

२६८

पूर्णं वपनं व्रतयज्ञयोः गोवधादिषु सर्वेषु छेदयेदंगुलित्रयम् सधवानां स्त्रीणामलंकाराय सर्वदा के
शसंधारणं प्रोक्तं प्रायश्चित्ते द्विजइत्यत्र सधवाग्रहणोपादानात् द्विविधवानां वपनमस्त्येव नांगुलित्रयप्रमा
णमात्रेण छेदः यस्तु पवनं नेच्छति तं प्रतिहारीनः राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः केश
नोपवनं कृत्वा प्रायश्चित्तं समाचरेत् केशानां रक्षणार्थं तु द्विगुणं व्रतमाचरेत् केशानां रक्षणार्थं
तु द्विगुणं व्रतमाचरेत् द्विगुणे व्रत आचीर्णे दक्षिणा द्विगुणा भवेत् अत्र राजादय उपलक्षणार्थः
यत्र राजादय उपलक्षणार्थः यत्र राजादीनामप्येवं किमन्येषामित्यर्थः यत्र राजादीनामप्येवं
किमन्येषामित्यर्थः एतच्च द्विगुणदक्षिणादानं महापातकादिव्यतिरिक्तस्थले वपनमनिष्टौ ॥
विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनम् ऋते महापातकिनो गोहन्तुश्चावकीर्णिन इति विष्णु
प्रोक्तस्मरणान्नेष्यते सर्वात्मना न विधीयते अपितु वपनाभावे द्विगुणव्रताद्याचरणेन शुद्धिर्भवा
तीत्यर्थः अतो महापातकागोवधाद्यवकीर्णिप्रायश्चित्तेषु वपनमेव इतरप्रायश्चित्तेषु वपनाति

यावताकालेनयस्यापनिवृत्तिः तावतामहापातकानिव्यपोहेदिति यमः तस्करश्वापदाकीर्णेबहुव्यालमृगे
वने नव्रतेब्राह्मणः कुर्यात्प्राणबाधभयात्सदा शरीरंधर्मसर्वस्वंरक्षणीयंप्रयत्नतः शरीरात्स्रवतेधा
र्मः पर्वतात्सलिलंयथेति अथव्रतस्यग्रहणकालस्तत्प्रकारश्च व्रतग्रहणंव्रतानुष्ठानदिवसात्पूर्वदिनेसा
यान्हेकार्य्यं यथाहविष्णुः सर्वपापेषुसर्वेषांव्रतानांविधिपूर्वकम् ग्रहणंसंप्रवक्ष्यामिप्रायश्चित्तेचिकी
र्षिते दिनान्तेनखरोमादीन्प्रवाप्यस्नानमाचरेत् भस्मगोमयमृद्वारिपंचगव्यादिकल्पितैः मलापक
र्षणंकार्य्यंबाह्यशौचोपसिद्धये दन्तधावनपूर्वेणपंचगव्येनसंयुतं व्रतंनिशामुखेग्राह्यंबहिस्तारकद
र्शने आचम्यातःपरंमौनीध्यायंदुष्कृतमात्मनः मनःसंतापनंतीव्रमुद्वहेच्छोकसंततम् इति बहिर्ग्रामा
द्बहिः वसिष्ठः कृच्छ्राणांव्रतरूपाणांश्मश्रुकेशादिवापयेत् अक्षरोमशिखावर्ज्जमितिव्रतरूपाणिप्रा
यश्चित्तरूपाणियानितत्रोक्तरीत्यावपनंकेवलंपुण्यार्थिनोनास्तीत्यर्थः बौधायनः केशश्मश्रुनख
लोमवपनंचान्द्रायणादिषु एतदेवस्त्रियःकेशवपनवर्ज्जमिति अत्रविशेषः केशानांनास्तिनारी।

णो ब्राह्मणानां तु क्षत्रियाणां पुरोहितः वैश्यानां याजकश्चैवं प्रायश्चित्तं समादिशेत् अगुरुः क्षत्रियाणां
शूद्रो वैश्यानां चाप्ययाजकः प्रायश्चित्तं समादिश्य पतनं सकृच्छ्रं समाचरेत् एवमुत्कृष्टवर्णेषु ब्राह्मणो विशुद्
द्धितिनम् अथोत्कृष्टं त्विह द्विजातीनां हन्तातिशाययोगात् निकृष्टानां च वक्ष्यामि प्रायश्चित्तमतः परम् ॥
प्रायश्चित्तप्रश्ने न्यायतो मार्गमाणस्य क्षत्रियादेः प्रणामिनः अन्तरा ब्राह्मणं कृत्वा व्रतमेषां समा
दिशेत् तथा शूद्रं समासाद्य तदा धर्मपुरःसरम् प्रायश्चित्तं प्रदातव्यं वेदमंत्रविवर्जितम् शौवलि
कृच्छ्राणि द्विजातीनामेव नावरस्य कामं धर्मेच्छोरप्रतिषेधः साधारणधर्मेश्च नियमश्च शूद्रस्य
वेदमंत्रसहितस्य प्रायश्चित्तस्य निषेधः तद्रहितस्याभ्यनुज्ञा सुमंतुः अथ वा रागद्वेषादलभ्यमा
नेषु प्रायश्चित्तेषु यज्ञहवनाध्ययनब्रह्मचर्यपरो भैक्षाशी दण्डी मेखली स्वयमेव संवत्सरेण महापा
तकानि तरत्यपोहति किल्बिषी न ब्राह्मणस्य पतनमिच्छन्त्याचार्याः अस्यार्थः रागादिवशात् पर्षदः
सकाशात्प्रायश्चित्तमलभमानः स्वयमेव यज्ञहोमाध्ययनादिनिष्ठो ब्राह्मणः संवत्सरेणोक्तलक्षणम्

नेवसाध्येमवाप्नोति प्रायश्चित्ते कृतेपि सः २

म॰
पा॰
२५८

कृतयावृत्पुरुस्तथाश्रेयोधिगच्छति वृहच्छातातपनःतपः यद्विनाधर्मशास्त्रेण प्रायश्चित्तं विधीयते नैवशुद्धिमवा
प्नोति प्रायश्चित्तं विधीयते अष्टदशधर्मशास्त्राणि प्रायश्चित्तं वदंतिये प्रायश्चित्तीभवेत्सततस्तत्पापंपर्षदंव्रजेत्
अंगिराः कृत्वापूर्वंसमुदाहारंयथोक्तं धर्मकर्तृभिः पश्चात्कार्यानुसारेण शक्त्याकुर्युरनुग्रहम् धर्मकर्तृभि
र्धर्मशास्त्रकृतैः मातापितृशुश्रूषाकार्यानुसारेण देवलः एकोनार्हतितत्कर्तुमनोचानूच्यनुग्रहम्
धर्मज्ञाबहवोविप्राः कर्तुमर्हन्त्यनुग्रहम् स्नेहाद्यद्वालोभाद्भयादज्ञानतोपिवा कुर्वन्त्यनुग्रहंयेतुन
त्पापंतेषुगच्छति शारीरस्यात्ययेकार्यःसम्प्रायेनियमोद्विजैः महताचापराधेननत्वेवस्यकदाचन कार्यअनु
ग्रहः कार्यकृत्स्नयपिः महानुपराधोमहत्पापम् अंगिराः आर्तानामार्गमाणाणां प्रायश्चित्तानियेद्विजाः जा
नन्तोनप्रयच्छन्तितेतेषामेंशभागिनः तस्माद्दातुंसमासाद्यब्राह्मणांचविशेषतः अनिर्चिंतैरनाकृतैरदृष्टै
श्चैवसंसदि प्रायश्चित्तंनदातव्यंजानद्भिरपिकल्पतः सर्वेषांनिश्चितंयस्त्वयस्त्वप्राणान्तपातयेत् आह
यश्चावयुक्तैः पर्षदायातिपाजितः शृणुभोस्त्वमिदंविप्रैर्यत्नुवादिश्यतेव्रतम् नतेयत्नेनकर्तव्यमेनस्यो
तद्धयाद्वत् यदात्वयाभवेच्छीर्णंव्रतंशुद्धिकरंमहत् तदाकुर्याःप्रयत्नेनशक्त्याविप्राभिपूजनम् ब्राह्म

णं क्रियते मया संप्रायस्थलेपीत्यर्थः पर्षदग्रे विख्यापनं च दक्षिणादानानंतरं रूपो दित्याह पराशरः अपापं प्रख्याप
येत्पापं दत्वा धेनुं तथा वृषमिति अत्र विशेषमाह विष्णुः पादत्वेनैव स्वदानं कृच्छ्रे गोमिथुनं स्मृतमिति अन्ये
वदिष्णाप्राप्त्याधिपेत्वेपोस्या यत्तु वचनम् विख्याप्य पापं वक्तृभिः किंचिद्दत्वा व्रतं चरेदिति तन्नप्रकीर्णविवि
षयं अथ प्रायश्चित्तनिर्णयः ॥ अङ्गिराः तेषां तु वेदितैः कार्य्य उत्सार्यो हि स कार्यवान् तस्मिंस्तु सारितेऽवि
प्रपेयपथा धर्मपाठकः तेन यातत्र जल्पेयुर्विमृष्यतः परस्परम् धर्मशास्त्रेषु यच्चोक्तं यच्चमानुग्रहे भवेत्
विमृष्य परिषत्सर्वं प्रायश्चित्तं प्रकल्पयेत् यथाकालं यथादेशं यच्च कार्यान्तरं भवेत् पर्षदा संमतं चैव कारि
णाश्च बलाबलम् सर्वेषां निश्चितं चैव यच्च प्राणान्न पीडयेत् कार्यान्तरम् वृद्धमातापितृशुश्रूषादि यच्च प्रा
णान्न पीडयेत् येन प्राणपीडाकरव्यतिरिक्तप्रायश्चित्तान्तरमस्ति तत्र प्राणबाधाकरं न देयमित्यर्थः देवलः ॥ कृ
च्छ्राणां दापको राजा निर्दिष्टो धर्मपाठकः अपराधी प्रयोक्ता चरिता कृच्छ्रपालकः राजा कृच्छ्राणां दापकः
प्रायश्चित्तनिर्दिष्टा धर्मपाठकलक्षणं पर्षल्लक्षणेभिहितं अपराधी पापकारी कृच्छ्रप्रयोक्ता राद्दिना राजशूद्रा
षः कृताकृतावीक्षणेन प्रायश्चित्तपरिपालकः तथा विचारस्ताह यमः कार्यः यथा सर्वैः सभासदैः एकवा

म॰
पा॰
२५

र्वियोगयेवासंप्राप्येनपा कृत्वापापंनगूहेत गूह्यमानस्सवर्धते बहुनास्वल्पकंवापिकर्मविज्ञोनिवेदयेत् प्राय
श्चित्तेसमनुप्राप्तेह्रीमान्सत्यपरायणः मृदुरार्जवसम्पन्नः शुद्धियाचेतमानवः सचैलंवाग्यतःस्नात्वाक्लिन्नवा
साःसमाहितः क्षत्रियोवापिवैश्योवापर्षदंसमुपतिष्ठिति क्षत्रियाश्चपादाने प्रदर्शनार्थं उपस्थायततः
शीघ्रमार्तिमान्पृथ्वींव्रजेत् गात्रैश्चशिरसाचैवनचकिंचिदुदाहरेत् ततस्तेप्रणिपातेनदृष्ट्वातंसमुप
शा
स्थितं वृद्धाःपृच्छन्तिकिंकार्यमुपतिष्ठपाग्रतःस्थितम् किंतेकाकार्यंवदास्माभिः किंवामृगयसेद्विज तत्त्वतो
ब्रूहितत्सर्वंसत्यंहिगतिरात्मनः अस्माकंचैवसर्वेषांसत्यमेवपरंबलम् यदिचेद्वदसिसत्यंनियतंप्राप्स्यसे
शुभम् यथागतोहिसत्येनतत्त्वंशुद्ध्यसिकर्हिचित् एवंसर्वमनुज्ञातः सर्वंब्रूयादशेषतइति नच्छेजीता
नुपस्थितइतिपर्षदमनुपस्थितः सशापर्षदमनुपस्थितः [illegible]संप्राप्यपर्षदुपस्थानं स्वकृतपापसन्देहे कार्य
मतिष्कृतिः पापस्यनिश्चयःप्रमादाच्चनकर्तव्यः पुनःपापंनकुर्यादित्यर्थः प्रमादाच्चनकर्त्तव्यःपुनःपापेन
कुर्यादित्यर्थः अथवादीर्घकालसन्देहानुवृत्तौहविष्यभोजनादिनाशरीरशोषणंप्रमादः सनकर्तव्यःय
थैवासौयपापस्यनिश्चये देशान्तरादिव्यवहितेषुविद्वत्सूपस्थानाप्रापयथाहविर्भोजनादिनाशरीरस्त

२५

वप्रायश्चित्तक्रमस्य च त्रयाणां यः प्रमाणतः स विकल्पी भवेद्द्विजः ज्योतिषामयने चैव स निरुक्तोऽङ्ग·विद्भवेत् वेदवि
धाश्रुतज्ञानः सत्यसंयोजितेंद्रियः अनेकधर्मशास्त्रज्ञः प्रोच्यते धर्मपाठकः ब्रह्मचर्याश्रमादूर्ध्वं हि द्वावाश्रमिणा
स्त्रयः वेदपुण्यस्यते धर्मान्येमयायपरिकीर्त्तिताः मनुस्तु ब्रह्मचर्यादीनां त्रयाणामाश्रमिणामाश्रमिणां धर्मवमा
रु त्रैविद्यो हेतुकस्तर्की नैरुक्तो धर्मपाठकः त्रयश्चाश्रमिणः सर्वे पर्षदेषा दशावरेति हैतुकोऽनुमानज्ञः तर्की
स्यात्तीति तर्की संप्रायेसत्येकस्मिन्कोटौ प्रमाणानि चत्वारो यैकृतोबाधकादर्शनात्प्रमाणानामाभूविनव्यामिति
यः सतर्कः स च वेदशास्त्राविरोधी ग्राह्यः अप्यपर्षदुपस्थानम् ॥ मनुः प्रायश्चित्तीयतां प्राप्य दैवात्पूर्वकृ
तेन वा न संसर्गं व्रजेत्सद्भिः प्रायश्चित्ते कृते द्विजः दैववशादिह जन्मकृतपापेन पूर्वकृतेन दूषयित्वस्याव
दूतत्वा यतुमिच्छेत्कृतनाविद्यावदेतादयः कृतत्वादीतुस्मात्पाटयित्वाकृतत्वीद्यावदनाश्वकृतंबूहाद्दशमाग्र
चरेदिति निमित्तं तथा तद्यित्वेति रोगनिमित्तदानादिरूपप्रायश्चित्तमेव ननु निदानभूतब्रह्महत्यादि
प्रायश्चित्ताध्याये अगीराः उपस्थितस्तु न्यायेन व्रतादेशेन मर्हति कृतेनिः संप्रायेपापेन भुंजीतानुपा
स्थितः भुंजानो वर्धयेत्पापमसत्पर्षदि ब्रुवन् संप्राये न तु भोक्तव्यं यावत्कार्यस्य निष्कृतिः प्रसादश्च न क

जातिगुणां हत्वा सकृद्बुद्धिकृतं लघु अनुबंधादिक हत्वा कल्प्यं सर्वं यथायोगं प्रकाशाउक्तं यत् किंचिद्विंशतिभागो
द्वादशके त्रिंशद्भागः षष्टिभागः कल्प्यो ज्ञात्वा यथापेक्षया अप्युपदिशेत् न त्रयधर्मविद्वत्तो द्वाविंशोप्यथ वैशेष
वा मूढो वा न केपं च न प्रायश्चित्तविधानं हि कुर्वंतीति विद्वुद्बुधाः आव्रतानाममंत्राणां जातिमात्रोपजीवि
विनाम् सहस्त्वशात उक्तानां पर्षत्त्वं नोपपद्यते पातके च शतं वर्षत्सहस्रं महदादिषु उपपातके तु पंचाश
शत्स्वल्पे स्वल्पकं तथा भवेत् बहुभिर्विद्वद्भिर्मिलित्वा विचार्य प्रायश्चित्तं विधेयमिति शतादिग्रहणं ताता
त्पर्यार्थः अत एव याज्ञवल्क्यः ॥ चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा सा ब्रूते यं स धर्मः स्यादेको वाध्या
त्मवित्तमः देवधर्मोश शास्त्रज्ञाश्चत्वारो ब्राह्मणाः पर्षत् ऋग्यजुःसामात्मिकास्तिस्रो विद्याः तत्सम
हस्त्रैविद्यम् तेन तत्त्वज्ञातृत्रयो ब्राह्मणाः लक्ष्यंते न त्वेते त्रयः पर्षदित्यर्थः अत्रापि धर्मः शास्त्रज्ञत्व
मनुवर्तते एवमुत्तरत्रापि आत्मानमधिकृत्य प्रवृत्तं शास्त्रमध्यात्म अंगिराः चातुर्विद्यं विकल्पी च
वेदांगविद्धर्मपाठकः त्रयश्चाश्रमिणो मुख्याः पर्षदेषा दशावरा ॥ चतुर्णामपि वेदानां पारगो यो द्विजो
त्तमः स्वयमेव विनाप्युक्तैः शास्त्रविधिमिति स्मरणम् धर्मस्य पर्षदश्चैव प्रायश्चित्तक्रमस्य च त्रयाणां
यः प्रमीतो स्तः सविकल्पी भवेद्द्विजः यो हेतुर्न सविकल्पे च मीमांसायां हेतुनिश्चितः ज्योतिषामयने चै

नसिगुरूणि लघूनि कृच्छ्रातिकृच्छ्रौ चान्द्रायणमिति सर्वप्रायश्चित्तमिति अस्यार्थः तेष्वपापसक्ति
प्रकरणोक्तानि संशोधकानि जपादीनामन्यतमस्यापि पापनिर्हरणहेतुत्वमस्त्येव प्रत्येकसमस्ते
नानिर्देशात् रहस्यत्रात्मणानामुपनिषदः बृहदारण्यकाद्यवेदान्ताः उपनिषत्त्वेपि बृहदारण्यकादी
नोपदेशगुणपादो माधिकप्रयोजनार्थं सर्वपुराणवास्तुपदं क्रमरहितामंत्रग्रंथाः सर्वे छंदःसुसंहिताः मधु-
वातऋतायतीति यज्ञोषिमपूनि ऋतंच सत्यं चेत्यघमर्षणं अथर्वशिरः अथर्ववेदैकदेशः प्रसिद्धः न
मस्ते रुद्रमन्यव इत्याद्याध्यायो रुद्रः सहस्रशीर्षः पुरुषसूक्तम् राजनरौहिणसामनी इन्द्रशोनेमधिना
हिरण्यय इत्यस्यामृचि गीयते बृहद्रथंतरे त्वामिद्धि हवामहे अभित्वाशूर नोनेम इत्यनयोर्गीते पुरुषगतिः
अहमस्मि प्रथमजा ऋतस्य इत्यस्यां गीतं सौव विद्याम घेवन्निमा याः ऋचो महानाम्न्यः पिवा सोममिन्द्रेत्यस्यां
गीतं साम महादिवाकीर्त्यं आज्यदोहादीनि सामानि ज्येष्ठसामानि उपासेमा यतेति स्तोत्रे हविष्मवमा
नं पदे देवव्रतं यजुर्विकूष्माण्डाः स्वादिष्टयेत्याद्या ऋचः पावमान्यः गोमयमध्यस्थितयवसाधिताय
वागूः प्रसृतयावकः गोष्ठप्रसिद्धं परिस्कंदः गोव्रजमार्गः सर्वतीर्थानि सर्वदेशेषु च प्रायश्चित्तमित्य
र्थः विश्वामित्रः उपपातकयुक्तानामनादिष्टेष्वेव चैवाह प्रकाशे रहस्ये च तत्त्वमिसंख्याद्यपेक्षया शक्ति

म० पा० २५५

तामहभ्रातृमातामहमातुलश्वशुरोपाध्यायकाचार्यदेगुर्वीचार्योपाध्यायर्त्विजां पत्न्यर्यमातृष्वसृपितृष्वसृपर्यवस्ना:
त्वाल्वयमस्त्रमांघ्रालभते साद्दातिमित्रो: कुर्वन्सुतस्वतुर्थांघ्रलभते द्दम्पत्नीसपत्न्यश्चामिथोर्धफललभते
देवल: अभिसंगम्यतीर्थानि पुण्यान्यायतनानि च प्रमुच्यते नर: पापाद्ब्राह्मणायेन पास्विन: सर्वा:स
मुद्रगा: पुण्या: सर्वे पुण्या नगोत्तमा: सर्वमायतनं पुण्यं सर्वे पुण्या वनाश्रया: ॥ अथ सामान्येन पा
वनिस्मृतिहेतव: तत्र गौतमबौधायनौ तस्पतिस्मृपणानि जपस्तुपो होम उपवासो दानमुपनिषदो
वेदान्ता: सर्वे छन्द: सुसंहितापधून्यघमर्षणमथर्वशिरो रुद्रा: पुरुषसूक्तं राजनरौहिणे सामनी बृ
हद्रथंतरे पुरुषगतिर्महानाम्न्यो महावैराजं महादिवाकीर्त्यं ज्येष्ठसाम्नामन्यतमं बहिष्पवमानं कूष्माण्डा
नि पावमान्य: सावित्री चेति पावनानि पयोव्रतं शाकफलभक्षणप्रभृति पावकं हिरण्यप्राशनं घृत
प्राशनं सोमपानमिति मेध्यानि सर्वे शिलोच्चया: सर्वा: स्रवन्त्य: पुण्या ह्रदास्तीर्थान्यृषिनिवासो गोष्ठपरि
स्कन्द इति देशा: ब्रह्मचर्यं सत्यवचनं सवनेषूदकोपस्पर्शनम् आर्द्रवस्त्रता ऽधःशायिता नाशक इति त
पांसि हिरण्यं गौर्वासो अश्वो भूमिस्तिला घृतमन्नमिति देयानि संवत्सर: षण्मासाश्चत्वारस्त्रयो द्वौ ए
क श्चतुर्विंशत्यहो द्वादशाह: षडहस्त्र्यहो ऽहोरात्र इति काला: एतान्येवानादेशे विकल्पेन क्रियेरन् ए

२५५

नगादिषु योजनतां गंगातः सर्वेभ्यः कल्याः ततो द्वादशयोजनगा अल्पनद्यः चतुर्विंशतियोजनगा तानद्यः कृच्छ्र
यफलप्रदाः चतुर्विंशतियोजनाधिकगा महानद्याः समुद्रगाश्च यत्रच महानदीति व्यपदेशस्ताश्च महानद्यः
उपवाससहितं महानद्यां स्नानं योजनाद्र्वागपि कृच्छ्रसमं ऋत्विजनाम्न्योनद्यः पापनदाश्च वर्ज्याः समुद्रस्ना
ने सर्वत्र दर्शे कार्यं देवतासमीपे सरोनदीसंगमेषु सर्वदा कार्यं पंचदशयोजनागात स्य समुद्रस्नानं पंचदश
कृच्छ्रफले प्रतिष्ठ देवतासमीपे द्विगुणं तत्रस्नात्वात देवता दर्शने तु त्रिगुणं त्रिंशद्योजनदूरात्सेतुगमने
त्रिंशत्कृच्छ्रसमं तत्रस्नात्वा रामेश्वरदर्शने द्विगुणं गंगादेशीयानां सेतुरामेश्वरो जान्हव्यास्त्रिगुणफलं त
थैव जान्हवी केदारयोरपि दक्षिणदेशीयानां जान्हव्यां षड्गुणं गंगादेशीयानां सेतुरामेश्वरे षड्गुणं सर्वत्र
भाषाभेदपर्वतादिभिर्व्यवधाने मार्गस्य मत्वे चोक्तयोजनसंख्यातो योजनह्रासेन कृच्छ्रादिफलानि कल्प्या
निप्रयासाधिक्यात् सर्वं वैसर्वमाहेश्वरसोमनाथ क्षेत्रपीठे षु दर्शने न योजनसंख्यया कृच्छ्रसंख्या प्रख्याने शुद्धि
गुणं तीर्थतीरस्थितस्यापि योजनपरिमितान्यदेशादागतागमने मतेरेणापि विधिवत्स्नात्वाधोतवासः परि
धाय शिरोरुहेषु नान्द्रेषु सत्सु पुनः स्नातव्यम् एवं द्वादशभिः स्नानैरेकः कृच्छ्रो भवति परार्थगन्तुः षो
डशफलं प्रसङ्गगमाधे फलं लभते अनुषंगेन तीर्थं प्राप्य स्नानफलमेव लभते तपयात्राफलं पितृपि

55[illegible]

म. पा. २५४

जनागतस्याष्टकृच्छ्रसमं धर्णायां तदर्धं कृष्णवेण्यां योजनसंख्यया कृच्छ्रसंख्या तथा तुङ्गभद्रायामपि पम्पा
संगमे द्विगुणं हरिहरे त्रिगुणम् भीमरथ्यामपि योजनसंख्यया ककुद्मिनीसंगमे दशयोजनागतस्य षं
चटकाकृच्छ्रफलम् मलापहारिण्यां योजनसंख्यया कृच्छ्रसंख्या तथा निवृत्त्यामपि गोदावर्यां यात्रायां यो
जनद्वेशापादकृच्छ्रवृद्धिः सिंहे गुरौ सर्वत्र जान्हवीसमा कन्यास्थे गुरौ कृष्णवेण्यायां सर्वत्र जान्हव्यर्थः॥
गुणभद्रायां तुलास्थे रवौ कर्कटस्थे गंगार्धं कृष्णवेण्यायां मलापहारिणीसंगमे त्रिंशद्योजनागतस्य न
वकृच्छ्रं भीमरथीसंगमे द्विगुणं तुंगभद्रासंगमे त्रिगुणं निवृत्तिसंगमे चतुर्गुणं ब्रह्मेश्वरे पंचगुणं
मल्लिकार्जुनसमीपे पातालगंगायां षड्गुणं कावेर्यां महानद्यां दशयोजनागतस्य कृच्छ्रफलम् द्वाद पंचदश
शयोजनागतस्य द्वादशकृच्छ्रसमं ताम्रपर्णीकीर्तिमालापयस्विनीप्रभृतस्वादिपादोनूना नद्यो योजन
मविच्छिन्नप्रवाहरूपाः स्वदैर्घ्यानुसारेण योजनागतस्यैकद्वित्रिकृच्छ्रफलप्रदाः विंध्यश्रीशैलोद्भवा
द्विगुणाः हिमाचलोद्भूतास्त्रिगुणाः स्मृतिपुराणादिषु यथा कथंचिदनुक्ता योजनागतस्यार्धत्रयफ
लप्रदाः अल्पनद्यः कृच्छ्रफलप्रदाः नद्यो द्विकृच्छ्रफलप्रदः महानद्यः कृच्छ्रत्रयफलप्रदाः एकयोज

नीवहस्त्वक्त्रापौनः पुण्यापूर्णा पुण्यावाङ्कदागण्डकीवाहण्यादिदेवनदीषु स्नानं पंचदशयोजनागतस्य पं
चदशकृच्छ्रसमं एतास्तु महानदीषु परस्परसंगमे योजनागतस्य कृच्छ्रत्रयफलं समुद्रगामहानदीषि
स्नात पूर्वोक्तदेवनदीनां संगमे योजनागतस्य षट्कृच्छ्रफलं अन्यत्स्थलेषु मात्रा योजनसंख्यया कृच्छ्रसंख्या
विज्ञेया महानदीषु महानद्यर्धफलं शोणमहानदे गंगार्धफलं नदीषु नद्यर्धफलं गण्डमहानदी
सेतुगोमेश्वरं पद्मनाभं श्रीरंगं पुरुषोत्तमम् कुरुक्षेत्रं नैमिषं बदर्याश्रमं पुण्यारण्यं केदारं श्रीशैलं म
हालयं रुद्रकोटिं नर्मदं पुष्करं नर्मदामाहात्म्यानकेश्वरम् कुब्जाम्रं प्रभासं कोकामुखं विजयेशं पुरीन्द्र
पंचनादं गोकर्णं मथुरामयोध्यां द्वारवतीं गयां काञ्चीं शवलग्रामं सालिग्राममित्यादि मुक्तिदक्षेत्राणि संसे
वं गंगासमं फलं लभते चतुर्विंशतियोजनागतस्य नर्मदायां स्नानं चतुर्विंशतिकृच्छ्रफलं कुब्जिका
संगमे द्विगुणं पुष्कले तीर्थे चतुर्गुणं अष्टयोजनागतस्य गोदावर्यां अष्टकृच्छ्रसमं त्रिंशद्योजनागतस्य का
दम्बनीपेषु प्रतिलोमानुलोमस्नानं षाष्टिकृच्छ्रसमं वेणासंगमे नाद्विगुणं हरिहरे त्रिगुणं समगो ह
वरी भीमेश्वरे त्रिगुणं कृष्णतर्पणे वेणायां द्वादशयोजनागतस्य द्वादशकृच्छ्रसमं मणीनायामष्टयो

यतस्यभागीरथ्यांस्नानेषडब्दकृच्छ्रसमं अग्रेऽप्येकैकस्ययात्रायोजनस्यवृद्धावर्धकृच्छ्रवृद्धिः कल्पनीयाः षष्टियोजना
गतस्यषडब्दव्रतात् दशयोजनागतस्याब्दप्रायश्चित्तंभवति एवंचनर्मदायांशताधिकक्रोशादागतस्यभागीरथ्यां
विप्रस्यस्नानेनैकः कृच्छ्रोभवति मध्येचेत्पर्वतादिभिर्व्यवधानंभवति एवंनाद्यभावेमार्गस्यदुर्गमत्वेच
योजनागतस्यशक्तस्यगंगास्नानेमेकःकृच्छ्रोभवति अशक्तस्यतुयोजनादागतस्यशक्तस्यापिमार्गस्यदुर्गमत्वेर्ध
योजनादागतस्यैवंकल्पनीयं पूर्वंसप्तमात्रकारादसभायामृषयोजाताः गतेभयेपुनर्देवताअभूवन् न
तोनद्यःपुण्याःतेषुस्नानेषुभागीरथ्यांसमभवन् तासुविष्णुगंगादिसप्तमात्रकानामस्तुगंगास्नानेयोज
नागतस्यषडब्दकृच्छ्रतुल्यंप्रयागेनारायणस्यांगंगाद्वारेगंगासागरसंगमेचद्विगुणं यमुनांचाविंशतियो
जनागतस्यस्नानेद्व्यब्दकृच्छ्रसमं मथुरायांद्विगुणं सरस्वत्यांचत्वारिंशद्योजनागतस्यचतुरब्दसमम्
प्रभासेद्वारावत्यांचद्विगुणंयमुनासरस्वत्योर्यात्रायोजनवृद्धौपादकृच्छ्रवृद्धिः ह्रासस्तुपूर्वोक्तरीत्याकल्प्यः
हरिद्वारेतीर्थेयात्रिविपाशावितस्ताइरावती मरुद्वृधामधुमतीपयस्विनीघृतवतीत्यादिदेवनदीषुस्नाने
त्रिंशत्कृच्छ्रसमंपंचदशयोजनागतस्यचंद्रभागावेत्रवतीसरयूगोमतीदेविकाकौशिकीतिसजलामन्दाकि

सं२

द्वरणान्नभोजनानि कृच्छ्रे तु प्राजापत्यद्वयमेवातिकृच्छ्रस्थले प्राजापत्येष्वेकभक्तत्रयेऽपि सायंतनभोजनत्रय
निवृत्तावेकोपवासनिष्पत्तेरिति तथाहि एकस्मिन्दिवसे दिवारात्रौ चेत द्विभोजनं तत्र भोजनत्रयनिवृत्तौ
सार्धोपवासः प्राप्नोयद्यपि तथापि दिनत्रयेऽपि किंचिद्भुज्यते इत्येकोपवास एव कल्पनीयः एवमकृच्छ्रत्रयोः
याचितत्रयेऽपि किंचिद्भुज्यते इत्येकोपवास एवमुपवासत्रयं दिनत्रये शुद्धोपवासा इति षडुपवासाः प्राजा
पत्ये भवंति एवमन्यत्राप्यूहनीयम् वृषभैकादशगोदानयुक्त त्रिरात्रोपवासात्मको गोवत्सवधे सा
र्धप्राजापत्यद्वयम् तथा षड्त्रिंशन्मते पराकतप्तातिकृच्छ्राणि तेषु कृच्छ्रत्रयं चरेत् सांतपनस्यवाप्यर्ध
मासिकैकोव्रतमाचरेत् पाकाद्यशक्तौ प्राजापत्यत्रयं सांतपनाशक्तौ सार्धप्राजापत्यं चरेदित्यर्थः सर्वप्राय
यपेत्तथा त्रिगुणादिकं कल्पनीयं अथ तीर्थयात्राख्यानम् तत्र समूलप्रदर्शनार्थं मादित्यपुराणोक्तं॥
पाण्डव राज्यलाभाय दुरितोपशमाय च श्रीकृष्णनारदव्यासश्रीकण्ठेन्द्रराजरोमशौ मार्कण्डेयपुलस्त्या
जसमर्षिप्रमुखैस्तथा द्वादशाद्वादशाब्दानि कृच्छ्राण्यापाद्य भक्तितः तीर्थैरूर्ध्वंवित्रिसादिपुराणोक्त्यनेक
क्षेत्रेति स्मृतिसंग्रहस्तत्र्यास्थसारादिभिः कृतप्रकारैरस्माभिरपि लिख्यते तत्र संकल्पपूर्वकं पञ्चाशष्टियोजना

म॰ पा॰ २५२

हिंस्तस्यैव चेति एतेस्समानप्रत्याम्नायामहापातकेषु षष्ट्यधिकं शतत्रयं भवति प्रत्याम्नायेप्यल्पाद्विगुणात्त्रिगुणात्
मकं कल्पनीयम् महापातकसमेषु महापातकप्रायश्चित्तापेक्षयापादोनम् आदिष्टेषु सार्धत्रैवार्षिकप्रा
जापत्यविषयेषु तेषूपपातकेषु पादः त्रैमासिकप्रायश्चित्तविषयेषूपपातकेषु सार्धसप्तप्राजापत्यानि
मासिकव्रतविषये तु सार्धप्राजापत्यद्वयं चान्द्रायणपनोद्ये उपपातके प्राजापत्यत्रयं तथा च धर्मविद्
नौ चान्द्रायणं स्मृतं गोरस्तैः पवित्रेष्टिरित्यस्यैव च मित्रविंदापशुश्चैव कृच्छ्रत्रयमथापि वा तिलहोमायुतं
तं चैव पराकद्वयमेव च गायत्र्यालक्षमेकं तु सामान्याद्भुर्मनीषिणा इति पिपीलिकामध्याद्विचान्द्रा
यणासमर्थस्यातिधनद्वारा प्रायश्चित्तं चिकीर्षतः प्राजापत्यप्रत्याम्नायाष्टौ भवति तथा चतुर्विंश
तिमतेऽष्टौ चांद्रायणे देयाः प्रत्याम्नायविधौ सदेति प्रत्याम्नायाधिकारात्पूर्वोक्तविषयतया कल्प्या सप्त
तिकृच्छ्रविषये तु प्राजापत्यसार्धसप्तप्राजापत्यानि तथा च चतुर्विंशतिमते प्राजापत्ये तु [illegible]मेकं दद्या
त्सांतपने द्वयम् पराकनामातिकृच्छ्रेति स्वाक्तिस्वस्तु गालस्येति द्वादशदिनसाध्यः कृच्छ्रः तप्तमासचराणि
सार्धसप्तप्राजापत्यकृच्छ्रो भवति एतस्त्वैकैकग्रासमश्नीयादिति मनूक्तातिकृच्छ्रे याज्ञवल्क्यात्कपाणि

२५२

समानायेतिपंचमं यदाचत्वारस्तदाद्वाभ्यांप्रथमं यदात्रयस्तदाद्वाभ्यांद्वाभ्यांपूर्वौ यदाद्वौतदाद्वाभ्यामेवोत्त
रमेवैकैकंसर्वैरपि ग्रसार्थः यदाचत्वारोग्रासाभवंत्येतेतदाप्रथमद्वितीयाभ्यांप्रथमंग्रासंग्रसेत् तृतीयेनद्वि
तीयं चतुर्थीनतृतीयं पंचमीनचतुर्थं यदात्रयस्तदाद्यद्वितीयाभ्यांप्रथमं तृतीयचतुर्थीभ्यांद्वितीयं
यदात्वेकस्तदासर्वैरेवतंग्रसेदिति अथकृच्छ्रप्रत्याम्नायः मन्वाद्युक्तद्वादशवार्षिकादिचरणाशक्तस्य
तद्दशकोद्वादशाद्वादशदिनात्मकैकैकप्राजापत्यं एवंगणप्रमाणेद्वादशवार्षिकेप्राजापत्यानांषष्ट्यधिकं
शतत्रयंभवति तद्दसंकौतावद्धेधेनवः धेन्वसम्भवेतावन्निष्कदाने तथाचस्मर्यते प्राजापत्यक्रिया
याशक्तौधेनुंदद्याद्द्विजोत्तमः धेनोरभावेदातव्यंमूल्यंतुल्यंनसंशयइति तुल्यमूल्यंसमूल्यदानाशक्तौ
निष्कार्धंपादंवा यदाहुः गवामभावेनिष्कंस्यात्तदर्धंपादमेवचेति मूल्यदानाशक्तौतावंतउदवासा अ
त्राप्यशक्तावयुतगायत्रीजपः कृच्छ्रःप्रत्याम्नायः तथाचपराशरः कृच्छ्रोयुतंचगायत्र्याउदवासस्तथैव
च धेनुप्रदानंविप्रायसममेतच्चतुष्टयमिति षट्त्रिंशन्मते कृच्छ्रोयुतंत्रगायत्र्याद्वादशब्राह्मभोजनं
तिलहोमसहस्रंचवेदाध्ययनमेवच वेदाध्ययनंसंहितामात्रपारायणम् विप्राद्वादशवाभोज्याःपावके

दित्यमुपतिष्ठतेति षट्त्रिंशन्मते जपहोमादियत्किंचित्कृच्छ्रोक्तं सम्भवेन्नचेत् सचव्याहृतिभिः कुर्यान्नायम्याप्र
णवेनच शंखः एकवासाचरेद्भिक्षांस्नात्वावाससानपीडयेत् गायत्र्यादशसाहस्रमाह्निकंजपउच्यते बौधा
यनः अहतंवासोवसीतस्नाविंश्रीव्याहृतीश्चैवजपेदष्टसहस्रंकृत्वा ओंकारमादितः कृत्वानूपेनूपेतपानततः
भूमौवीरासनंकुर्यात्कुर्याज्जप्यसमंततः आसीनःशल्यविद्धोवापिवेद्गव्यंसकृत्पयः गव्यस्यपयसोला
भेगव्यमेवभवेद्दधिः दध्नोलाभेभवेत्तक्रंतक्रालाभेतुयावकम् एषामन्यतमंयत्तुउत्पद्येतचतत्पि
वेत् शल्यविद्धइवेत्यत्रइवशब्दउपमार्थशल्यविद्धोवेत्यत्रवाशब्दउपमार्थेशल्यविद्धइवनिश्चलस्सा
न्नासीनः पयःपिवेदित्यर्थः यमः अंगुल्यग्रेस्थितः पिंडगायत्र्याचापिमंत्रितम् प्राश्याचम्यपुनः
कुर्यात्दनस्याप्यभिमंत्रणं आपोशानानंतरंपंचप्राणाहुतयोपिपंचभिर्ग्रासैः प्राणायस्वाहेत्यभिमंत्रि
तैः अत्रचओमित्यादिमंत्रास्सगुह्यंते यदिगायत्र्यापिण्डाभिमंत्रणंतदागायत्रीप्राणायस्वाहेत्या
दयस्त्वत्र्ययोभूरित्यादिभिस्तर्हितेप्राणायस्वाहेत्येवमादयस्त्वभवंति यदाचत्वारस्त्रयोवाग्रासास्त
त्रबौधायनः अग्नीयात्प्राणायेतिप्रथममपानायेतिद्वितीयं व्यानायेतितृतीयं उदानायेतिचतुर्थं

ऊनाधिकस्नानान्यन्यान्यपि शक्त्याशक्त्यपेक्षयायोज्यानि तप्तकृच्छ्रेतुसकृदेवस्नानं सकृत्स्नायीसमाहित इ
तिमनुवचनात् जाबालः आरम्भेसर्वकृच्छ्राणांसमाप्तौचविशेषतः आज्येनैवविशालाग्नौजुहुयाद्व्या
हृतीः पृथक् श्राद्धंकुर्याद्व्रतेचैवगोहिरण्यंचदक्षिणा गृहीगृहेऽपिनिवसन्ब्रह्मलोकेमहीयते स्त्रीणां
होमोनदातव्यः पंचगव्यंतथैवच स्त्रीशूद्रस्यतच्छूद्रार्थंप्रजापतेःसमादिशेत् पंचगव्यंचकुर्वीतस्ना
त्वापीत्वाशुचिर्भवेत् पंचगव्यस्यविहितप्रतिषेधत्वाद्विकल्पः जाबालेन शालाग्नौहोमंविधाय
स्त्रीणांहोमोनदातव्यइतिगृह्याग्नावेवहोमनिषेधः अतश्चस्त्रीशूद्रयोरपिब्राह्मणद्वारालौकिका
ग्नौहोमोभवत्येव अतएवधर्मविवृत्तौ उपवासोव्रतंहोमस्तीर्थस्नानंजपादिकम् विप्रैःसंपादितं
यस्यसंपन्नंतस्यतत्फलमिति यत्त्वत्रिवचनम् पंचगव्यंपिबेच्छूद्रोब्राह्मणस्तुसुरांपिबेत् उभौ
तौतुल्यदोषौहिपूयास्येनरकेवसेत् तदप्रायश्चित्तांतंगांपंचगव्यप्राशनेवेदितव्यं वैशम्पायनः स्ना
नेह्निकालमेवस्यात्त्रिकालंवाद्विजन्मनः शंखः एकवासाआर्द्रवासालघ्वाशीस्थण्डिलेशायइत्यादि
हारीतः अवगाह्यशुद्धवतीभिःस्नात्वाघमर्षणमंत्रंजलेजपित्वाधौतमहतंवासः परिधायसामान्यासौम्येना

म. पा. २५४

पापनोदनः तथाघमर्षणं सूक्तं सर्वपापापनोदनम् अत्रैव विशेषमाह विष्णुः प्रत्यहं त्रिषवणस्नानमाचरेत् त्रिः
प्रतिस्नानमप्स्वमज्जेत् मग्नश्च त्रिरघमर्षणं जपेत् दिवा स्थितस्तिष्ठेत् रात्रावासीनः कर्मणोऽन्ते पयस्विनीं दद्या
दिति याज्ञवल्क्यः अनादिष्टेषु पापेषु शुद्धिश्चान्द्रायणेन तु धर्मार्थं यश्चरेदेतच्चन्द्रस्यैति सलोकताम्
कृच्छ्रकृद्धनकामस्तु महतीं श्रियमाप्नुयात् अथ कृच्छ्रचान्द्रायणसाधारणेतिकर्तव्यता याज्ञवल्क्यः कृ
योत्रिषवणस्नायी कृच्छ्रचान्द्रायणं तथा पवित्राणि जपेत्पिण्डान् गायत्र्या चाभिमन्त्रयेत् त्रिषवणस्नायी सपवित्राणि
अघमर्षणं देवकृतः शुद्धवत्यस्तरत्समन्दीत्यादि वासिष्ठादिप्रदर्शितानि ऋग्यजुःसामप्रदर्शितानि यथाशा
त्वं जपेत् आविकृत्स्नकालेषु पिण्डान् ग्रासान् गायत्र्याभिमन्त्रयेत् ग्रासान्तु मन्त्रेण गौतमोक्तः ॐ भूरित्यादिमन्त्रैः
सह गायत्र्या विकल्पः भिन्नकार्याणां समुच्चय इति ज्ञातव्यम् मनुः महाव्याहृतिभिर्होमः कर्तव्यः स्वयं
मन्वहम् अहिंसा सत्यमक्रोधमार्जवं च समाचरेत् त्रिरह्नस्त्रिनिशायां तु सवासा जलमाविशेत् स्थाना
सनाभ्यां विहरन्नशक्तोऽधः शयीत च ब्रह्मचारी स्वयं च स्यात् गुरुदेवद्विजार्चकः सावित्रीं च जपेन्नित्यं पवित्राणि
च शक्तितः सर्वेष्वेव व्रतेष्वेवं प्रायश्चित्तार्थमादृत इति दिवा त्रिः रात्रौ त्रिरित्यत्र षट् स्नानेनच्छेक विषये एवं

२५०

ज्ञानानो ह्रासानुसारेकादिक्रमेणवृद्धेः कृसचतुर्थ्यारम्भदिनमितिगम्यते तेनेन त्रिरात्रमभिहितत्वात् शुक्लपक्षे
ह्राइतिप्रतीयते तेन तदनुपपन्नं साक्षात्तत्वं तृप्तिसाधनं अपितुतत्स्थितं पयः अग्रे च होमो विहितः होमस्तु द्रव्या
साध्यः तस्य द्रव्यं कुमतदुग्धपरित्यागेन कल्प्यमाज्यादिकं न युज्यते तस्मात्स्तनस्तनादिस्थितं दुग्धं गृहीत्वा या
ते सोमेत्यादिभिर्मन्त्रैः प्रतितिथ्येकैकामाहुतिं हुत्वा पयः पिबेत् चान्द्रायणयमोनिर्दिष्टमाश्वलायनोक्तमप एव पयः पा
रमेत्रो हुत्वैवं कर्तव्यः याते इति सोमयं पंचमेति पंचम्या एवं षष्ठ्याः षष्ठी पदप्रयोगः उत्तरत्राप्यमावास्याय
र्यन्तमेव पुनः प्रतिपदि प्रथमातन्तूरित्येवं प्रयोगः ततो द्वितीयादिषु द्वितीयातनूरित्यादि एतस्य चतु
र्विंशतिदिनसाध्यं यथायथास्तिथिहोमाः स्युः कृत्वा चतुर्थी द्वादशी मध्ये यत्र तिथिक्षयो न भवेत् चतुर्विंशतिदि
नानि भवंति तदेव कर्तव्यमेवं सोमायनमप्राकृतविषयं प्राकृतविषये मार्कण्डेयः गोक्षीरं सप्तरात्रं तु पिबे
त्स्तनचतुष्टयात् स्तनैनैकेन षड्रात्रं त्रिरात्रं वायुभुग्भवेदिति अथ यावकव्रतम् शंखः गोपुरीषाद्यवा
न्तेतुमासे तिनित्यं समाहितः व्रतं तु यावकं कुर्यात्सर्वपापापनुत्तये अथाघमर्षणव्रतम् मनुः त्र्यहं तूप
वसेद्युक्तः त्रिरह्नो भ्युपयन्नपः मुच्यते पातकैः सर्वैस्त्रिर्जपित्वाघमर्षणम् यथाश्वमेधः क्रतुराट् सर्वपा

स्तनत्रयात्सप्तरात्रं तु पिबेत्स्तनचतुष्टयात् स्तनत्रयात्सप्तरात्रं सप्तरात्रं स्तनद्वयात् २.

द्वितीयादिष्वारम्भो भवति तत्र न दोषः चन्द्रगत्यनुसारेण त्रिंशद्दिनात्मकसावनमासानुसारेणानुष्ठेयत्वात् अत्र
च चान्द्रायणशब्दो गौणस्तद्धर्मप्राप्त्यर्थः तिथिनियमेन ग्रासनियमस्तत्र पूर्वं प्रक्रान्त उपवासादिकमप्यन
कारयेत् एष्वेव प्रकारेषु क्वचन मनुना विशेषसंज्ञा दर्शिताः अष्टावष्टौ समश्नीयात्पिण्डान्मध्यन्दिने स्थि
ते नियतात्मा हविष्यस्य यतिचान्द्रायणं चरन् चत्वरः प्रातरश्नीयात्पिण्डान्नियतात्मा ह[illegible]व्रतः हविष्यान्न
स्यैव मासमृषिचान्द्रायणं स्मृतमिति अथ सोमायनम् एतदपि चान्द्रायणधर्ममेव अथ सोमायनं
एतदपि चान्द्रायणधर्ममेव अथ यातश्चान्द्रायणं स्मृतमिति अथ सोमायनम् एतदपि चान्द्रायण
धर्ममेव अथ यातश्चान्द्रायणमनुक्रमिष्यन्निति हारीतेनेतिकर्त्तव्यतासहितं चान्द्रायणमभिधायैवमेव
सोमायनमित्यतिदेशात् न च कृच्छ्रचतुर्दशीमारभ्य कृष्णद्वादशीपर्यन्तमनुष्ठेयं तथा च हारीतः चतुर्थीप्र
भृति चतुस्तनेन त्रिरात्रं त्रिस्तनात्रिरात्रं द्विस्तनेन द्विरात्रमेकस्तनेन द्विरात्रमेवमेकस्तनप्रभृति पुनश्चतुस्त
नान्तेनैवं यथान्ते सोमचतुर्थीतिनूतयानः याहितस्येतेस्वाहा यानेसोमपंचमीषष्ठीमेवं यथार्थास्तिथिहोमा
एकामासमापनोभ्यः पूतस्वर्द्धमसासामान्यतां समानलोकतां सायुज्यं च गच्छतीति चतुस्त्रिद्व्येकादिक्रमेण

उच्यत्र कदाचिन्नक्तं कदाचिद्दिवेति तदनुसारेण कर्त्तव्यं ग्रासग्रसनं तथा च हारीतः चन्द्रमसं चंद्रस्रप
पिबानवो नव इति हुत्वा ज्योत्स्नायां चरुशेषां पिण्डान्त्सा विश्वमभिमंत्रिता ग्रश्नीयादिति ग्रासग्रसनसमये
पातिपित्तास्तया ग्राससंख्योपादेया ज्योत्स्नाशब्देन चन्द्रोदयो लक्ष्यते तथा चार्थराजादावपि भोजनदे
शोनास्ति शंखः ग्रामान्नमकलमात्रास्तु ग्रासा इड्डलयेस्मृताः तथैवात्र तपस्त्वग्रशो चार्थचैव मन्त्रिकाः
मतुः एकैकं ह्रासयेत्पिण्डं कृष्णे शुक्ले च वर्धयेत् उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं स्मृतम् ॥ अथ
चान्द्रायणेनैनगाणि याज्ञवल्क्यः यथाकथंचित्पिण्डानां चत्वारिंशच्छतद्वयम् मासेनैवोपभुंजीतं चा
न्द्रायणमथापरम् पिण्डानां चत्वारिंशदधिके शतद्वयं मासेनोपभुंजीत यथाकथंचिदिति अत्रायं क्र
मः दिने दिने ष्टौ ग्रासान्भुंजीत अथवा चतुरो दिवा चतुरो नक्तमिति अथवैकस्मिन्दिने चतुरोपरस्मिन्द्वा
दश उतैकरात्रमुपोष्यापरस्मिन्दिवा षोडशायद्वा दिनद्वयमुपोष्य तृतीयदिने द्वात्रिंशदित्यादि प्रकारा
णां मध्ये यात्तयापेक्षया भुंजीतेति अत्र तिथ्यपेक्षया ग्रासनियमो नास्ति उपक्रमस्तु शुक्लकृष्णप्रतिप
दोरन्यतरत्र कर्त्तव्यः यस्तु नैरंतर्येणैवं वि चान्द्रायणानुष्ठानं करोति तस्य तिथिवृद्धिह्रासवशेन कदाचिद्

ॐ भूः भुवः स्वः तपः सत्यं यशः श्रीः ऊर्क् इट् ओजः तेजः पुरुषः धर्मः शिवः इत्येतैर्ग्रासानुमंत्रणं हविर
नुमंत्रणं अत्र मंत्रान्तेन मनसा स्वाहेति वा प्रयुंजीत ततः प्रतिमंत्राश्चतुर्थ्यंताः ॥ अथ ग्रासप्रमाणमस्या
धिकारेण चतुर्भैक्ष्यसक्तुकणयावकपिण्याकपयोदधिघृतमूलफलोदकादीनि हवींषि उत्तरोत्तरप्र
शस्तानि पौर्णमास्यां पंचदश ग्रासान्भुक्त्वा एकापचयेनापरपक्षमश्नीयादमावास्यामुपोष्यैकोपच
येन पूर्वपक्षं विपरीतमेकैषां चान्द्रायणो मासः इति ग्रासप्रमाणमस्याधिकारेणोनियतुंकेनाच्छिन्न
एडपरिमितं पंचदशादिग्रासभोजनासमर्थबालादिविषयं एवमेव कुक्कुटाण्डान्दामकलपरिमाणम
पिण्डं कृत्वा पेक्ष्यायोज्यं चतुर्दश्यामुपवासः पौर्णमास्यां पंचदशग्रासभोजनम् ततएकैकग्रास
ह्रासः अमावास्यावामुपवासः पौर्णमास्यां पंचदशग्रासभोजनम् अमावास्यायामुपवासस्ततः
पौर्णमासीपर्यंतं पंचदशग्रासवृद्धिः इति त्रिंशद्दिनसाध्यं चान्द्रायणम् योगीश्वराद्युक्तचान्द्रायणा
पेक्षयान्यदेव एतच्चपिपीलिकामध्यं विपरीतेन करणेन तु यवमध्यं भवति ग्रासवृद्धौ ह्रासे च तिथि
वृद्धिक्षयवशात्कदाचित्षोडशत्वं कदाचिच्चतुर्दशत्वमपि भवति ग्रासस्तु चंद्रोदये जाते ग्रसनीयः

ग्रयणम् तदावपतंभवति अभ्युदयार्थिनोनभवतीत्यर्थः तथा आप्यायस्वसंतेपयांसिनवोनव
परेतनाभिस्तर्पणंआज्यहोमोहविषश्चानुमंत्राणां उपस्थानेचन्द्रमसो यद्देवादेवहेडनमितिच
तसृभिराज्यंजुहुयात् देवकृतस्येतिचानेसमिद्भिः ॐभूर्भुवःस्वः तपःसत्यंयशःश्रीःऊर्क् इडौ
जस्तेजःपुरुषोधर्मः इत्येतैश्रीमात्रमंत्राणां प्रतिमंत्रमनसानमः स्वाहेतिसर्वानेतैरेवग्रासांभु
जीत· आप्यायस्वेत्यादिभिःनवोनवइत्यनेनत्रिभिर्मंत्रैस्तर्पणंकृत्वाचन्द्रमसउपस्थानंकृत्वाआज्य
ज्यहोमः हविरनुमंत्रणंचकुर्यात् चन्द्रमसोपस्थानेमंत्राः आप्यायस्वेत्यादयः यद्देवादेवहेडन
मितिप्रतिमंत्रंहोमः देवकृतस्येनस्सोवयजनमसीत्याद्यकेकात्सकृ समिद्भिरितिबहुवचनात्कर्थि
जलन्यायेनयद्यपित्रित्वमेवप्रतीयते तथापियद्देवादेवहेडनमितिचतसृभिरितिपूर्वमेवचतुःसंख्योपा
दानात् त्रित्वतावदपगतंप्रकरणबलात् अपगतेचत्रित्वेदेवकृतस्यत्यस्मिन्नृगात्मकवाक्येवानरवाकानोष
ट्संख्याकत्वात् समिद्भिरितिबहुवचनंषट्स्वेवपर्य्यवस्यतीतिवाक्यबलात्षडङ्गतयः समिधांभव
ति पिण्डकरणात्पूर्वंहविरनुमंत्रेणामंत्राआप्यायस्वेत्येवमादयः पिंडाकरणानंतरमोसिस्येवमाद्यः

कादीनि उदकप्रधानानां सक्तूनां जाबालिः अतप्तं जलमध्यस्थः त्वहोरात्रं जपं त्रयः संवत्सरकृतं पापं जलकृ
च्छ्रो व्यपोहति जयो वारुणसूक्तानां योगयाज्ञवल्क्यः वायुभक्षो दिवा तिष्ठेद्रात्रिं नीत्वाप्सु सूर्यदृक् सहस्रा
ष्टाधिकं जप्त्वा गायत्रीं जलसंततिः द्वितीयदिने सूर्यदृष्ट्याष्टोत्तरसहस्रगायत्रीजपं कृत्वा पारणां कुर्या
दित्यर्थः अयं जलकृच्छ्रः तथा मासोपवासो विज्ञेयो दिनत्रिंशदुपोषणात् तथा गोमूत्रकृच्छ्रः आत्रेय
श्चारयित्वा गां गोधूमान् यवमिश्रितान् तान् गोमयोत्थान् संगृह्य पचेद्गोमयपावकमिति अथ चान्द्रायणं
याज्ञवल्क्यः तिथिवृद्ध्या चरेत्पिण्डान् शुक्ले शिख्यण्डसंमितान् एकैकं ह्रासयेत्कृष्णे पिण्डं चान्द्रायणं च
रन् इंदुक्षयेन भुंजीत एष चान्द्रायणो विधिरिति तिथिवृद्ध्या द्वितीयादिषु चंद्रकलावृद्धेः प्रतिपद्द्वितीयाऽऽ
दितिथिवृद्ध्या भक्षयेत् शिखी तित्तिरः मयूरः अण्डप्रमाणान् चान्द्रायणं ह्रासवृद्धिभ्यां चन्द्रस्यायनेव चरणमि
व चरणं यस्मिन्कर्मणि तच्चान्द्रायणं संज्ञायां दीर्घः इदं यवमध्यचान्द्रायणम् मध्ये ग्रासाधिक्येन
स्थूलत्वात् गौतमस्त्वन्यथाह॰ अथातश्चान्द्रायणं तस्योक्तो विधिः कृच्छ्र इति कृच्छ्रे यदुक्तम् तिष्ठेद
हनीत्यादि तत्सर्वमत्रभवतीत्यर्थः अत्र विशेषमाह वपनं व्रतं चरेत् व्रतप्राप्याश्वितम् नदर्ण्यश्च्या ।

द्विरात्रसंपाद्यः सांतपनमहाकृच्छ्रः उक्तं मनुः तप्तकृच्छ्रं चरन्विप्रो जलक्षीरघृतानिलान् प्रतित्र्यहं पि
बेदुष्णान्सकृत्स्नायी समाहितः प्रतित्र्यहमलादीन्प्रत्येकं त्र्यहं त्र्यहं पिबेदित्यर्थः अयं च द्वादशरात्रसाध्यः
जलादिपरिमाणमाह पराशरः अपां पिबेत्त्रिपलं तु पयः पिबेत् पलमेकं पिबेत्सर्पिस्त्रिरात्रं चोष्ण
मारुतम् त्रिरात्रस्य पूरणात्तु सोदकवाष्पं पिबेदित्यर्थः प्रकारान्तरेणाप्याह तप्तकृच्छ्रः पराशरः षट्प
लं तु पिबेदम्भः त्रिपलं तु पयः पिबेत् पलमेकं पिबेत्सर्पिस्तप्तकृच्छ्रे विधीयते अथ शीतकृच्छ्रः विष्णुः
त्र्यहमुष्णाः पिबेदापः त्र्यहमुष्णं पयः पिबेत् त्र्यहमुष्णं पिबेत्सर्पिर्निराश्नीयादेष तप्तकृच्छ्रः एष एव शीतः
शीतकृच्छ्रः अयं दिनत्रयसाध्यः पराशरः त्र्यहं शीतं पिबेत्तोयं त्र्यहं शीतं पयः पिबेत् त्र्यहं शीतं घृतं पीत्वा
वायुभक्षस्त्र्यहं परम् द्वादशदिनसाध्योयम् अथान्येपि कृच्छ्राः प्रभवः बिसान्युदकसिद्धानि मासमश्नीत
संयतः सक्तून्वा सोदकान्मासं कृच्छ्रो वारुण उच्यते बिल्वैरामलकैर्वापि पद्माक्षैरथवा शुभैः मासेन लोके
श्रीकृच्छ्रः कथ्यते द्विजसत्तमैः गोधूमान्यावकान्नं च मासेन नियतः समाहितः व्रतं तु यावकं कुर्यात्सर्वपापा
पनुत्तये विष्णुः उदकादिसक्तूनां मासमभ्यवहारेणोदककृच्छ्रः बिसाभ्यवहरणेन शीतकृच्छ्रः उद

पुष्पीलताविशेषः ब्रह्मेति ब्राह्मीविशेषः कुशादीनां मध्ये त्रिरात्रं निक्षिप्य क्वाथः कर्तव्यः अयं तु समाहसाध्यः
शाखलि पद्मबिल्वपलाशोदुम्बरकुशोदकान्येकैकमभ्यस्तानि पर्णकृच्छ्रः समस्तान्येतानि त्रिरात्रेण प्रयु
क्तानि पर्णकूर्चं इति अत्रापि क्वाथ एव अभ्यासे विशेषमाह यमः एकैकं त्र्यहमभ्यस्तः पर्णकृच्छ्रो विधीयते
एवं च पंचदशाहसाध्योयं एवं समस्तान्येतानि इत्यादि पद्मबिल्वपलाशोदुम्बरकुशोदकानि एतानि
समस्तानि क्वाथयित्वा त्रिरात्रोपोषितः सर्पिर्वेत्स पर्णकृच्छ्रः तथा च यमः एतान्येव समस्तानि त्रिरात्रो
पोषितः शुचिः क्वाथयित्वा पिबेदद्भिः पर्णकूर्चो विधीयत इति अथ फलादिकृच्छ्रः मार्कण्डेयः
फलैर्मासेन कथितः फलकृच्छ्रो मनीषिभिः शरीरयात्रामात्रोपयुक्तानि मासं भक्षयेत् तत्र सर्वव्रत
साधारणोनि कर्तव्यतापि कर्तव्यतानि च फलानि कानीत्यपेक्षायामाह स एव श्रीफलैरेव पद्माक्षैर
परमथा मासेनामलकैरेवं श्रीकृच्छ्रमपरं स्मृतम् पत्रैर्मतः पत्रकृच्छ्रः पुष्पैस्तत्कृच्छ्र उच्यते मूलकृ
च्छ्रः स्मृतो मूलैः तोयकृच्छ्रो जलेन च इति पत्रैः श्रीवृक्षादि पत्रैः पुष्पाण्यपि श्रीवृक्षादीनां मूलान्यपि ते
षामेव अथ तप्तकृच्छ्रः याज्ञवल्क्यः तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत् एकरात्रोपवासश्च तप्त
कृच्छ्र उदाहृतः दिनचतुष्टयसाध्यः कृच्छ्रः मिताक्षरायां तु अयं महातप्तकृच्छ्र एभिरेव सोयवादे

याज्ञवल्क्यः पृथक्सांतपनैर्द्रव्यैः षडहः सोपवासकः सप्ताहेन तु कृच्छ्रोऽयं महासांतपनः स्मृतः गोमूत्रगोमयक्षी
रदधिसर्पिःकुशोदकैः सांतपनद्रव्यैरेकैकस्मिन्दिने एकैकं पिबेत् सप्तमदिवसे उपवासः एतानि कुशोदकादिप्र
ज्ञानानि त्र्यहाभ्यासान्तरनिर्वर्तकानि एवमुत्तरत्रापि यमः त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं पिबेत् त्र्यहं दधि
त्र्यहं सर्पिः त्र्यहं क्षीरं ततः शुचिः महासांतपनं ह्येतत्सर्वपापप्रणाशनम् एतत्पंचदशाहसाध्यम् जाबालिः
षण्णामेकैकमेतेषां त्रिरात्रमुपयोजयेत् त्र्यहं चोपवसेदेतं महासांतपनं विदुरिति षण्णां पूर्वोक्तगोमूत्रा
दीनां अयमेकविंशतिरात्रसाध्यः अथातिसांतपनम् यमः एतान्येव तथा पेयान्येकैकं तु त्र्यहं त्र्यहम्
अतिसांतपनं नाम श्वपाकमपि शोधयेदिति एतानि गोमूत्रादीनि कुशोदकान्तानि षट् एतच्चाष्टादशाहा
साध्यं अथ पर्णकृच्छ्रः याज्ञवल्क्यः पर्णोदुम्बरराजीवबिल्वपत्रकुशोदकैः प्रत्येकं प्रत्यहाभ्यस्तैः प
र्णकृच्छ्र उदाहृतः पर्णाः पलाशाः पत्रादिपत्रान्तानां कुशानां चैकस्य क्वाथोदकमेकैकस्मिन्दिने पिबेत्
एष च पञ्चदिनसाध्यः जाबालिः पलाशबिल्वपत्राणि पद्मानां पर्णान्यौदुम्बराणि च अश्वत्थस्य च पर्णा
दिनभेदेकैकशस्तथा अहोरात्रोपवासश्च पर्णकृच्छ्र उदाहृतः अयं च षडहसाध्यः विष्णुः कुशपला
शोदुम्बरपद्मशंखपुष्पीवटब्रह्मसुवर्चलापत्रैः क्वथितस्याम्भसः प्रत्यहं पानेन पर्णकृच्छ्र इति शेष

म॰
पा॰
२४५

मूत्रेगोमयेहव्यवाहनः सोमःक्षीरेदध्निवायुर्घृतेरविरुदाहृतः गोमूत्रंताम्रवर्णायाःश्वेतायाश्चैवगोमयं पयःकां
चनवर्णायाःनीलायाश्चैवयादधि घृतंवैकृष्णवर्णायाविभक्तंवर्णगोचरम् उदकंसर्ववर्णानांतुतस्मवर्णानगात्स्य
ते गोमूत्रस्यपलंग्राह्यमंगुष्ठार्धंतुगोमयं क्षीरस्यत्रिपलंग्राह्यंपलमेकंकुशोदकम् आपोहिष्ठेतिचालोड्य
उद्धम्यप्रणमेनतु अग्नयेस्वाहासोमायस्वाहा इरावतीइदंविष्णुर्मानस्तोकेगायत्र्याप्रजापतेनत्वदेवतानी
त्याज्याहुतयोग्नौजुहुयात् नदीप्रस्रवणोतीरेरहस्येनिभृतेनतथा शुक्लवासाःपवित्रात्मास्वहोरात्रोषितःपि
वेत् पलाशेनचपात्रेणविल्वपात्रेणवापिवेत् तृतीयेनाम्रपत्रंवाब्रह्मपात्राणिनानिवै प्रतिमासंपौर्ण
मास्याममावस्यांचवापिवेत् ब्रह्महापरदारीचयेचान्येस्थिताःमलाः ब्रह्मकूर्चोदहेत्सर्वंयथाग्निस्तृणानि
वतु अथापरंब्रह्मकूर्चं गोमूत्रभागस्तस्यार्धंशकृत्क्षीरस्यचत्रयम् द्वयंदध्नोघृतस्यैकमेकंतुकुशवारि
णः इतिजाबालः ॥ गोमूत्राभागस्तस्यार्धंगोमयंक्षीरंदधिसर्पिःकुशोदकम् एकैकंप्रत्यहंपीत्वात्वहोरा
त्रमभोजनम् कृच्छ्रःसांतपनोनामसर्वपापप्रणाशनइति एतत्त्र्यहमाहसाध्या अथयतिसांतपनम् षडह
एतदेवत्र्यहाभ्यस्तंयतिसांतपनंस्मृतम् एतदेवमिश्रितंपंचगव्यंदिनत्रयंपिवेदित्यर्थः अथमहासांतपनम् २४५

दंपंचगव्यंतुपवित्रंपापनाशनम् गोमूत्रंधूम्रवर्णायाःश्वेतायाश्चापिगोमयं पयःकांचनवर्णायानीलाया
स्तुतथादधि घृतंचकृष्णवर्णायाःसर्वंकापिलमेववा अलाभेसर्ववर्णानांपंचगव्येष्वयंविधिः गोमूत्रे
माषकास्त्वष्टौगोमयस्यतुषोडश क्षीरस्यद्वादशप्रोक्तादध्नस्तुदशकीर्तिताः गोमूत्रवद्घृतस्येष्टास्तदर्धं
तुकुशोदकम् गायत्र्याचैवगोमूत्रंगंधद्वारेतिगोमयम् आप्यायस्वेतिचक्षीरंदधिक्राव्णेतिवैदधि
तेजोसिशुक्रमित्याज्यंदेवस्यत्वाकुशोदकम् पंचगव्यमृचापूतंहोमयेदग्निसन्निधौ सप्तपत्रास्तुये
दर्भाअछिन्नाग्राःशुकत्विषः एतैरुद्धृत्यहोतव्यंपंचगव्यंयथाविधि इरावतीइदंविष्णुर्मानस्तोकेति
ग्रावती एताभिश्चैवहोतव्यंहुतशेषंपिबेद्द्विजः प्रणवेनसमालोड्यप्रणवेनाभिमंत्र्यच प्रणवेनतुस
मुद्धृत्यपिबेत्प्रणवेनतु मध्यमेनपलाशेनपद्मपत्रेणवापिबेत् स्वर्णपात्रेणताम्रेणब्रह्मतीर्थेन
वापुनः यत्त्वगस्थिगतंपापंदेहेतिष्ठतिमानवे ब्रह्मकूर्चोपवासस्तुदहत्यग्निरिवेन्धनमिति याज्ञव
ल्क्यःकृच्छ्रसांतपनमेव ब्रह्मकूर्चोपवासइत्यभिधीयते विज्ञानेश्वरस्तु पूर्वेद्युरुपोष्यापरेद्युरुक्तरीत्या
पंचगव्यप्राशनेब्रह्मकूर्चइतिमन्यते मरीचिः देवताःसंप्रवक्ष्यामिआनुपूर्व्येणयस्ययाः वरुणोदेवता

म॰
या॰
२४६

नमित्युपक्रम्य ततः कर्मसमारभेदित्युक्तत्वात् तुलारोहणानन्तरमेवाचामपिण्याकादिभक्षणादिना व्रतं स
माचरेत् ~~तुलारोहणानन्तरमेवाचामपिण्याकादिभ~~ अत्र गृहमित्युपलक्षणं सामर्थ्येपि कर्तव्यं तुलादि
व्यप्रकरणे सामर्थ्येपि दोषयुक्तत्वाभिधानात् एतच्च दोषसन्देहे दोषनिश्चये तु दैवात् लघुत्वेपि प्रायश्चित्तं क
र्तव्यमेव दोषसन्देहे तु लघुत्वे उत्तरक्रियमाणं प्रायश्चित्तं गम्यते आत्मानं लाघवं मन्येत् ततः कर्मसमार
भेदिति इहहेतूपादानात् केवलपुण्योपार्जनार्थं तुलारोहणे कृच्छ्रकरणे गुरुत्वे सामर्थ्ये लघुत्वे च कर्तव्य
मेव विघ्नस्यैव स्वकृतोत्पादने हेतुत्वात् हारीतेन पौषमाघाषाढादिकालोऽभिहितः सोपि स्वकृतार्थिन
एव दुर्भिक्षादिनिमित्तानन्तरमेव कर्तव्यत्वात् अथ सान्तपनम् कुशोदकं तु गोक्षीरं दधि मूत्रं शकृद्घृ
तं प्राश्यापरेद्युरुपवसेत् कृच्छ्रं सान्तपनं चरेत् इत्यपरार्कपाठः मिताक्षरापाठस्तु गोमूत्रं गोमयं क्षीरं
दधि सर्पिः कुशोदकमिति गोमूत्रादीनि षडपि एकीकृत्य पीत्वाहोरात्रं रहितः स्थित्वान्येद्युरुपवसेदि
ति दिनद्वयसाध्यः कृच्छ्रः याज्ञवल्क्येनोत्तरश्लोके गोमयादीनां पृथक् षट्सु दिनेषु प्राशनविधानात्
अत्र मिलितानि मे एकदिनप्राशनं गम्यते पराशरः गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् उद्दि

२४६

तर्पीमात्यातं यदात्मगुरुमात्मानमित्यादे रयमर्थः अत्रासकृत्तुलयाधृतमित्यभिधानात् तथा राजन्यवैश्य
योर्द्विवकाष्टप्रतिकृतेस्स्थनेदृष्टत्वात् गंधादिप्रतिमाद्वयस्योक्तत्वात् स्वप्रतिकृतिद्वयं प्रत्येकं पलपरि
मितं चन्दनादिप्रतिमाद्वयं कृत्वा पलपरिमितपाषाणादि एकस्मिन्प्रकोष्ठे निक्षिप्य द्वितीयस्मिन्कोष्ठे स्वप्रति
कृतिद्वयमपि पृथक्पृथक् निक्षिप्य तोलयेदिति अत एवासकृत्तोलनं भवति त्रिप्रादेशमात्रतुला
विधिरपि पृथक्पृथक् निक्षिप्य तोलयेदिति अत एवासकृत्तोलनं भवति त्रिप्रादेशमात्रतुला
विधिरपि प्रकृतितोलनमेव प्रतिपद्यते सोऽत्रात्स्वरूपतोलनेनतस्यापर्याप्तत्वात् तथा श्लोके गुरुदक्षि
णाश्चेतास्तेनो गुरुप्रसादो वा नमस्तुलापुरुषायेति यमइति यत्किंचिद्दात्वा गुरुराचार्यः प्रसादनी
यः स एव प्रसादो वा दक्षिणेत्यर्थः अग्न्यादिसमर्पणासमर्थविषयमेतत् अत्रानुष्ठानक्रमः हो
हीतवचनेन तुलारोहणानन्तरं होममंत्राः पठिताः यमेरूपक्रममेव अतश्च होमक्रमो विकल्प्यते॥
होमं कृत्वा उमामहेश्वरपूजां विधाय तुलाभिमंत्रणानन्तरं महेश्वरपुरः प्रतिमाद्वयमादाय
तुलां पृथक्पृथक् पूर्वोक्तविधिनारोपयेत् ततो वा होमः कर्तव्यः॥ स्मृतिद्वयेऽपि यदात्मगुरुमात्मा

म॰
पा॰
२४३

हस्तगाह्निकम् अथवाउभयोःपार्श्वयोःप्रहृतलत्वंधाराद्वयेनप्रादेशत्रयपरिमितान्तुलाकार्येत्यर्थः उभयो
र्जातशिक्यं पार्श्वद्वयकृतशिक्याम् सौवर्णीराजतीवापितुलादेवीत्तुसाप्यता अथचन्दनवृक्षदास्यखलादिसा
यकारयेत् एतेषामप्यभावेतुतुलामान्योपपद्यते प्रतिमांकाचनीकार्यापकैवस्वर्णसंमिता उशीरस्या
पराकार्यातयानरकसंज्ञिता नदीमृत्तिकयावापिप्रतिमेन्द्रंतुकारयेत् विहितेसूपलिप्तेतुतत्रबीजा
निस्थापयेत् विहितेसूनाधिकरहिते ह्रीतोरूपलपरिमाणोइतियावत् सूपलिप्तेष्टपृतः सु
संस्पृष्टइतिस्मृतिभंजर्यां पृष्टभागोअवयवविभागोयथानज्ञायतेतथासमीकृतेइतितात्पर्यार्थः तत्र
तत्स्थापनप्रदेशेबीजानिब्रीह्यादीनिस्थापयेत् आदितिस्तुतुलामातास्वयंभूर्जनितातव त्वंहिसत्य
वचमेस्त्वयिलोकाः प्रतिष्ठिताः संम्वदसत्यवादिनिसत्येनरमतांमनः सत्यंनोसंपदंब्रूहिकिंमांसं
वर्धयिष्यसि राज्ञांचसंम्पदंब्रूहिकिमस्मात्वर्धयिष्यसि यदातुगुरुमात्मानअसत्कृत्तुलयाधृतम्
परेचलाद्यंवमन्येततःकर्मसमाचरेत् एतेनैवविधानेनब्राह्मणस्यविधीयते राजन्यवैश्ययोश्चैको
मूप्रकृतिकृतेस्मृते परेचलाद्यंवमन्येतपरद्याकाधिरोपितमप्यमादिलघुयदाभवतीतिस्मृति में

इति द्विचत्वारिंशाणाणापसमवाप्नोति द्विःहेमानाहिदैवस्यासनंप्राप्नोति ओंवाचस्पतयेऽधिपतयेस्वाहा वि
श्वेसर्वाधिपतयेस्वाहा येनदेवाः पवित्रेणात्तुलापुरुषमारुह्यपुनरुत्थिताः एवमहंपवित्रेणात्तुलापुरुष
मारुह्यपुनः पवित्राणांत्तुलापुरुषमावाहयिष्यामि करालंपिङ्गलंबभ्रुविश्वरूपमुमापतिम् योहिभेदं
ततोजातस्त्वमस्तंचमहामतिः अम्भसः पारेभुवनस्यनकापृष्टे महतोमहिमानंमहीयते उद्यतियोऽब्र
ह्मासनंस्तनयतिपुनायातिपः योभोजगद्गृहणाजोमनुजोमहोद्भुजः एकाक्षरंबहुधायाजमानंवर्णप्रथा
नेबहुधाविश्वरूपम् प्राणात्विनोभिहितोविश्वकर्मनतस्मैनमोनमइति स्वागतंभवतेतुलापुरुषायर
इमासनमास्यतांभगवते ततः पाद्यार्घ्याचमनानुलेपनमाल्यधूपदीपनैवेद्यैस्ताभ्यर्च्यभगवंतंसप
त्नीकंसपार्षदंपशुपतिमभ्यर्चयेत् सर्वगंसगाणांधूपमेत्रश्चभवति वनस्पतिरसोनिर्मंगंधात्योगाधउ
त्तमः आहारः सर्वभूतानांधूपोयंप्रतिगृह्यताम् सर्वत्रायंधूपमंत्रः अथतुलाभवति महापशुर्येनश
रेणविज्ञायत्वापिशास्त्रमुभयोर्लम्बलदंसतेनायसीन्तुलांस्तकृत्वांकारयित्वात्रिप्रादेशमात्रामुभयोजीतशी
काम् महापशुर्महाजः यच्चस्त्वमुभयोर्लम्बलदंस उभयोरायंतांभ्यांप्रहतनलदंय आयंतयोस्तीक्ष्णसंहि

म॰
पा॰
२४१

द्विहितं चयनं पिण्याकतानि निर्हरति अस्थिभिश्चाचयस्थितम् तैलस्य भक्ष्यमाणस्य तथा निषिद्धदिने अभ्यं
गादिषु प्रयोज्यमानस्य दाहणामलक्ष्मीकरणं यत्पापं केशापद्धिहतमस्थिभिश्चास्थितं यत्सर्वं कृतपापं दी
र्घकालत्वाद्दृढं संस्थितम् तदस्थिभिश्चास्थितमुच्यते आहारेषु चये दोषास्सर्पिर्दोषाश्च ये केचित् उक्ते
णानि मूलानि स्वभिर्यश्चावलोकितम् कनकं तु तिला गावो भूमिशय्यादानेस्त्रियः सर्वं पुनाति धर्मा
त्मा तर्पयेवोदकस्तंतुतिः कनकादिप्रतिग्रहजनितं पापं पुनातीत्यर्थः वाचाकृतं कर्मणा च मनसा
दुर्विचिंतितम् सर्वमेतत्त्रिरात्रेण पुनातीति न संशयः अयाज्ययाजनं चैव कन्यायामप्यदूषणम्
पञ्चगोमेपुनात्यापं वा पुंपीत्वा पुनाति तम् आहाराग्रमपि जुहोति आचामाह्निकआहारेः तस्मा
द्ग्रासचतुष्टयम् कुक्कुटाण्डपरिमितग्रासानुमानेन ग्रासचतुष्टयं जुहोति आहाराग्रमपि जुहोति
हृत्यपि प्राग्प्रोपादानात् आज्यहोमोभिधीयते अग्नये पृथिव्यधिपतये स्वाहा सूर्याय दिवस्पतये स्वाहा
इन्द्राय सुराधिपतये स्वाहा यमाय प्रेताधिपतये स्वाहा वरुणाय पाशाधिपतये स्वाहा स्कन्दाय महसे
नाधिपतये स्वाहा रुद्राय भूताधिपतये स्वाहा ब्रह्मलोका[illegible] तुलायै स्वाहा
तुलापुरुषाय स्वाहा प्रजापतिर्देवाय स्वाहा महद्भिस्सदेव पुन[illegible]चनान्यस्थिवासुधिः कर्मणाभ

२४१

सा२ धिपतये२

कर्मसमाचरेत् अग्नयेपृथिव्यधिपतयेस्वाहा सूर्यायदिवाधिपतयेस्वाहा सोमायनक्षत्राधिपतयेस्वाहा कु
वेराययक्षाधिपतयेस्वाहा इन्द्रायदेवाधिपतयेस्वाहा ब्रह्मणेत्रैलोक्याधिपतयेस्वाहा देव्यैभगाधिपतये
स्वाहा सालकटंकटायस्वाहा कूष्माण्डराजपुत्रायस्वाहा महाविनायकायवक्रतुण्डायगणानांपत
येस्वाहा धर्मायस्वाहाअधर्मायस्वाहा तुलायैस्वाहातुलापुरुषायस्वाहा प्रजापतिदेवायस्वाहा मरु
द्भिस्सदैवपुन्नागसकृच्चतारित्वाशुचिः कर्मणोभवति द्विचत्वारित्वागाणपत्यमवाप्नोति त्रिःकृत्वा
महादेवस्यासनंप्राप्नोति आषाढ्यांकार्तिक्यांफाल्गुण्यांपुण्येवानक्षत्रेयेषांविहितोधर्मइतिनिय
मः अप्यानोभगवन्तस्तुलापुरुषस्यकल्पंव्याख्यास्यामः अभक्ष्यभक्षणंकृत्वाविकर्मकरणेतथाप्र
सूतानांमृत्यादिनापध्मानांप्राश्यमूत्रंचपुरीषंचभोजयित्वाचनिन्दितान् अगम्यागमनंकृत्वादूषयित्वाचनि
न्दितान् अगम्यागमनंकृत्वादूषयित्वाचकन्यकाम् विनायकोपसृष्टस्यमहाव्याधिहतस्यच पाच
नाचगृहीतस्यसिद्धिहीनस्यवापुनः स्वर्गमार्गावलम्बस्यनिर्वेदोपहतस्यच स्वर्गेतिस्वर्गोद्भोः॥
इदंपवित्रंदुराधर्षंमहापातकनाशनम् स्वर्गद्वारमिदंश्रेष्ठंमहादेवप्रणोदितम् वाङ्मनोभ्यांचकाये
नयानिपापानितिष्ठन्ति आचामन्त्यानिनिर्दहन्तिनवश्राद्धंचसूतकम् तैलस्यदारुणांकिंविकेशापः

द्विजातीनांसंधि
गीर्हिचयोनिषुप्र
तिर्यग्योनिषुतथा
त्रिविधयोनिषुच
प्रसूताना

म॰
या॰
२४१

र्वं पुनातिधर्मोप्याग्रहं च्चोदकसक्तुभिः ब्रह्महत्यभ्रूणहत्या स्तुवर्णस्तेयं सुरापानं गुरुतल्पाभिगमनं कन्याहृष
णं स्त्रीवाभिगमनं वा पुमर्हः पुनातितत् गौयो श्रीरमयो कार्यौ पुरुषो पलसंमितौ नदीमृत्तिकयावापि
पुरुषौ द्वौतु कारयेत् महापस्तुर्येन शरीराविद्धोय ह्वाषास्तु पुभयोयतो यच्चलस्यमिति पादः नच्चैल
स्यतेनास्तुकृत्नीकारयित्वा प्रादेशमात्रमुभयोल्क्रांतशीकृतम् सौवर्णीराजतीवापितुलां देवेनुकारयेत्
श्रपिचंदनस्यवृक्षस्य यदिरणापिकारयेत् यः पुरुषः पिंगलोबभ्रू हलमुसलचक्रपाणिस्तमहं पुरु
षंपिंगलोबभ्रुहलमुसलचक्रपाणिस्तमहंपुरुषंपिंगलबभ्रुंहलमुसलचक्रपाणिमावाहयिष्यामि
स्वतएहिनागएहि कृष्णाजिनएहिस्वागतमस्तुस्वागतंभवतेतुलापुरुषाय महादेवाय इदमर्च्यमिदंपा
द्यमिदमाचमनीयमिदमासनंच प्रसीदगंधमाल्यधूपदीपंगृहाणायदेनो ममहृद्गः सुमनाभव अथतुला
मभिमंत्रयेत् ऋषिमसदेवसत्यं ब्रह्मसत्यमत्यस्त्येनेन सत्येन सत्यवादिनि देशानांसम्पदंब्रूहिकंश
वर्धयिष्यसि वीजानांसम्पदंब्रूहिकिंबीजवर्धयिष्यसि राज्ञांचसम्पदंब्रूहिकिंनृपवर्धयिष्यसि अ
स्माकंसम्पदंब्रूहिकिमस्माकंभविष्यति यथातुगुरुमात्मानमात्मानंतुलयाधृतेम शुभंचैवलघुमेमेनदा

२४१

म् तुलापुरुषइत्येषज्ञेयःपंचदशाह्निकः एवंपिण्याकाचाममंतक्रंतुसक्तूनांपंचानांप्रत्येकंक्रमेणत्रिरात्रम
भ्यासात्पंचदशाह्निकस्तुलापुरुषसंज्ञितःकृच्छ्रोभवति यमस्त्वेकविंशतिरात्रसाध्यंतुलापुरुषमाह आ
चाममथपिण्याकंतक्रंचोदकसक्तवः त्र्यहंत्र्यहंप्रयुंजानोवायुभक्ष्यस्त्र्यहंत्र्यहम् वायुभक्षस्त्र्यहंत्र्यहमि
त्यपिपाठः एकविंशतिरात्रस्तुलापुरुषइत्युच्यतेइति हारीतः अथातस्त्रिनयतप्रोक्तंतुलापुरुषस्यक
ल्पंव्याख्यास्यामः अयाज्ययाजनंकृत्वाप्राच्यसूत्रंशुभीषके अप्रतिग्रहमादाययाजयित्वातुनंदितान् ॥
विनायकोपसृष्टस्यमहाव्याधिहतस्यच एवंकृच्छ्रंतुलापुरुषंमहापातकनाशनम् स्वर्गद्वारमिदंपु
ण्यंमहादेवेननिर्मितम् आचाममथपिण्याकंतक्रंचोदकसक्तुकान् त्र्यहंत्र्यहंप्रयुंजानोवायुभक्ष्या
स्त्र्यहंपरम् वाक्यात्चैलरजोभिर्हतानिविहतानिच आचमस्तानिनिर्हंतिनवश्राद्धंचसूतकम् तैलस्प
र्शहरणंकिंचित्कीटाकीटहतस्यच पतत्प्राच्यसूत्रंशुरीषंचब्रह्महस्पृष्टमेवच पिण्याकस्तानिनिर्हंति।
अस्थिभित्वात्वयस्थितम् आचमेशुचयोदोषःस्नेहदोषाश्चयेक्वचित् रवोष्ट्रगुप्तसंस्पृष्टमधसंस्पृष्ट
मेवच तक्रेणतानिनिर्हंतियच्चाघ्राणावलोकितम् कनकस्त्वतिलागावोभूमिराच्छादनंस्त्रियः स

स्थानेद्विजोत्तम इति कल्प्यमानः एकभक्तकाल इति यावत् एकस्थान इति वचनाच्चतुर्विंशतिरात्रसाध्यमति
कृच्छ्रद्वयं कृच्छ्रातिकृच्छ्रात्मकः कृच्छ्रो भवतीत्यर्थः याज्ञवल्क्यः कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिय
मेन चतुर्विंशतियमेन चतुर्विंशतिरात्रसाध्यकृच्छ्रातिकृच्छ्रभोजनदिनेष्वेकैकग्रासविधानात् दुग्धभो
जनेपि यत्र घुटिकादिभिर्ग्रासपरिमाणं कृत्वा एकग्रासपर्याप्तं दुग्धमश्नीयात् एवं कर्त्तुमशक्तश्चेत्कृ
च्छ्रप्रकृतिभूतप्राजापत्योक्तरीत्या विंशत्यादिग्राससंख्यायाता वद्दुग्धं पातव्यं अथवा यावता प्राणावस्था
नो भवति तावद्ग्राह्यं अनुक्तद्रव्यपरिमाणेषु सर्वत्रैवं ग्रासं प्राणयात्रामात्रमेवेति गौतमाद्युक्तपदेषु श
क्त्यपेक्षया विकल्पः एवमुत्तरत्रापि द्रष्टव्यम् अथ पराकः याज्ञवल्क्यः द्वादशाहोपवासेन पराकः
परिकीर्त्तितः अथ सौम्यकृच्छ्रः पिण्याकं सक्तवस्तक्रं चतुर्थेहन्यभोजनम् वासो वै दक्षिणां दद्यात्सौम्यो
यं कृच्छ्र उच्यते पिण्याकं पिण्डितकल्कः आचामओदनावस्रावः पिण्याकादिकं प्राणयात्रोपयुक्तं ग्राह्यं
नाधिकं याज्ञवल्क्यः पिण्याकाचामतक्रांबु सक्तूनां प्रतिवासरम् एकरात्रोपवासश्च कृच्छ्रः सौम्योयमुच्य
ते एतच्च षड्दिनसाध्यं अथ तुलापुरुषाख्यकृच्छ्रः याज्ञवल्क्यः एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रम

णभोजनमिति यत्तु गौतमीयं प्राजापत्यं याज्ञवल्क्याद्युक्तप्राजापत्यद्वयेन द्रष्टव्यम् इतिकर्तव्यताकला
यात् त्रिप्रकाम इति विशेषोपादानाच्च अथातिकृच्छ्रः मनुः एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पूर्वव
त् त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन्द्विजः त्रीणि त्र्यहाणि नव दिनानि पूर्ववत् एकभक्तादिकालेन नियमयु
क्तः सान्निस्यपिः याज्ञवल्क्यः ॥ अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनात् अयमेव पूर्वोक्तप्राजापत्यधर्म
एव अयं तु विशेषः एकभक्तायाचितदिनेषु पाणिपूरणमात्रं प्रसृतिपूरणमात्रमन्नं भुञ्जीत न तु पूर्वो
क्तद्विग्रासादिग्रासानिति अत्र च पाणिपूरणान्नमात्रमेव विधेयं न तु भोजनम् अतो येषु दिनेषु प्राजा
पत्ये भोजनं प्राप्तं तदनुवादेन पाणिपूरणान्नता विधीयते इति नोपवासदिनेषु पाणिपूरणान्नभोजनप्राप्तिः
मनुयाज्ञवल्क्योक्तपाणिपूरणग्रासयोः शक्त्यपेक्षो विकल्पः पापापेक्षो वा अतिकृच्छ्रपादादिव्यवस्थाः
प्राजापत्यवदेव अथ कृच्छ्रातिकृच्छ्रः गौतमः अब्भक्षस्तृतीयः स कृच्छ्रातिकृच्छ्रः इति द्वादशरात्रमुदकेनैव
वर्तनं नान्नेनेव यमः एकैकं पिण्डमश्नीयात्कल्प्यपिण्डं त्र्यहं निशि अयाचितं त्र्यहं पिण्डं वायुभक्षस्त्र्यहं परम्
अतिकृच्छ्रं चरेदेनं तपविद्रपापनाशनम् चतुर्विंशतिरात्रं तु नियतात्मा जितेन्द्रियः कृच्छ्रातिकृच्छ्रं कुर्वीत एक

णाविमुक्ताभविष्यामीत्येवंकामयते अयमहन्यवभृथकर्माविहद्दृष्टकालेष्वतिष्ठेत् रात्रावासीत तथाप्येवंयो
धाजपंसामजपंकुर्यादनुसवनंसंध्यात्रयउपस्पर्शनंस्नानंत्रिषुवणास्नानमित्यर्थः हिरण्यवर्णाइत्याद्याभि
परिमार्जनमेव एतच्चमार्ज्जनंस्नानानंतरमेव अथोदकतर्पणम् तत्रमंत्रानमोहमायेत्यादयः अत्रमं
त्रसंदर्भस्यादावंतेचनमः शब्दश्रवणान्मंत्रादावंतेचनमः शब्दश्रवणान्मंत्रादावंतेचनमः प्राद्दोभव
ति तथाचैवंमंत्रप्रयोगाः ॥ नमोहमायमहमायधुन्वतेतापसायपुनर्वसवेनमइति एवंनमोसौ
ज्यायेमारम्भसर्वविन्दायनमः इत्यंतमेकोमंत्रः एवमुत्तरत्रापि द्रष्टव्यम् एवंनमोज्यायेच्या
भसर्वविन्दायनमः इत्यंतमेको एवंत्रयोदशमंत्रैस्तर्पणंकुर्यात् ततश्चएतद्देवादित्योपस्थानम् एत
द्देवमंत्रजातमादित्योपस्थानसाधनम् आदित्योपस्थानसाधनम् कार्यकारणयोरभेदोपचारः त
र्पणानंतरमेतैरेवमंत्रैरादित्योपस्थानंकुर्यादित्यर्थः एताएवाज्याहुतयः अत्राप्यभेदोपचारः एतैरे
वमंत्रैराज्यहोमः कर्तव्यः सचलौकिकाग्निंप्रतिष्ठाप्य एवंप्रतिदिनंकृत्वाद्वादशरात्रस्यांतेश्रमचेह
अपत्वाएताभ्योवक्ष्यमाणाभ्यआदित्यदेवताभ्योजुहुयात् नवमंत्राःस्वाहाकारांताभवंति ततश्चत्रास्य

तिसृभिः पवित्रवतीर्मार्जयीत .हिरण्यवर्णा इत्यष्टाभिः अथोदकतर्पणम् नमोहमायमंहमायधुन्वते
तापसायपुनर्वसवेनमोमौंज्यायोर्म्यायवसुविन्दावसुविदेसर्वविन्दायनमः पारायसुपारायमहापा-
रायपारदायपारयिष्णवेनमोरुद्रायपशुपतयेमहतेदेवायत्र्यम्बकायैकचरायाधिपतयेहरायशर्वा
येशानायोग्रायवज्रिणेघृणिनेकपर्दिनेनमः सूर्यायादित्यायनमोनीलग्रीवायशितिकण्ठायनमः
कृष्णायपिङ्गलायनमोज्येष्ठायश्रेष्ठायवृद्धायेन्द्रायहरिकेशायोर्ध्वरेतसेनमः सत्यायपावकाय
पावकवर्णायकामारूपिणेनमोदीप्तायदीप्तरूपिणेनमः सौम्यायसुपुरुषायमहापुरुषायम
ध्यमपुरुषायोत्तमपुरुषायब्रह्मचारिणेनमः चन्द्रललाटायकृत्तिवाससेनमः इति तर्पणान्तेदेवा-
दित्योपस्थानम् एतावाज्याहुतयोद्वादशरात्रसंमाप्तेचरुंश्रपयित्वाएताभ्योजुहुयात् अग्नयेस्वाहासोमा
य अग्नीषोमाभ्यांइन्द्राग्नीभ्यांइन्द्राय विश्वेभ्योदेवेभ्यः ब्रह्मणेप्रजापतयेअग्नयेस्विष्टकृतेइतिसमाप्तेब्राह्म
णभोजनमिति अथार्षः हविष्याशनस्त्र्यहान्कृत्वातिस्रोरात्रीर्नाश्नीयात् रात्रिषुभोजनेनकुर्या
त् तिष्ठेदहनिरात्रावासीततद्विप्रकामइति यस्तुप्राजापत्यकृच्छ्रद्वयापनोद्यात्पापात्क्षिप्रमेकेनैवकृच्छ्रे

कादीनामानुलोम्येन स्वस्थानवृद्धिरित्येकः प्रातिलोम्येन स्वस्थानविवृद्धिरिति द्वितीयः दण्डकलितवदावृत्तिरि
ति तृतीयः सर्वत्र जपादिरहितश्चतुर्थः तत्राद्यपक्षमाह मनुः त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम्
त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन्द्विजः अत्रैकभक्तादीनां स्वस्वस्थान एवाभिवृद्धत्वात् स्वस्थानविवृद्धिः
द्वितीयमाह वसिष्ठः प्रातिलोम्यं चरेत्पुत्राः कृच्छ्रं चान्द्रायणोत्तरम् उपवासत्रयं अयाचितत्रयं नक्तत्रय
मेकभक्तत्रयमिति आनुलोम्यं तृतीयमपि स एवाह त्र्यहः प्रातस्त्र्यहं नक्तमहरेकमयाचितम् अहः प
राकं तत्रैकमेवं चतुरहौ परौ पराकश्चाहः उपवासपरः तथानुग्रहार्थं विप्राणां मनुर्धर्मभृतां वरः
बालवृद्धातुरेष्वेवं शिशुकृच्छ्रमुवाच हेति चतुर्थपक्षमहाङ्गिराः तस्मात्कृच्छ्रं समासाद्य सदा धर्मपथे
स्थितः प्रायश्चित्ते प्रदातव्यं जपहोमविवर्जितम् जपाद्यधिकस्त्वत उद्दिष्टो नेतिकर्तव्यताविशेषमाह गौ
तमः अथातः कृच्छ्रान्व्याख्यास्यामो हविष्यान्प्रातराशान्भुक्त्वा तिस्रो रात्रीर्नाश्नीयात् अथापरं त्र्यहं
नक्तं भुञ्जीतापरं त्र्यहम् न कंचन याचेताथापरं त्र्यहमुपवसेत् तिष्ठेदहनि रात्रावासीत क्षिप्रकामः
सत्यं वदेदनार्यैर्न संभाषेत रौरवयौधाजपे नित्यं प्रयुञ्जीतानुसवनमुदकोपस्पर्शनम् आपो हिष्ठे

प्रातः षड्विंशा निर्मिताः चतुर्विंशतिरयाचाह्न परेनिरशनास्त्रयः कुक्कुटाण्डप्रमाणाः स्युर्यथावास्यंविशेत्सुखं
मिति अनयोः पक्षयोः शक्त्यपेक्षोविकल्पः एवमुत्तरत्रापि शक्त्यपेक्षो विज्ञेयः आपस्तम्बः चतुर्धाप्राजाप
त्यकृच्छ्रं विभज्य वर्णानुक्रमेण पादकृच्छ्रव्यवस्थामाह त्र्यहं निरशनं पादः पादश्चायाचितं त्र्यहम् सायंत्र्य
हं तथा पादः पादः प्रातस्तथा त्र्यहम् प्रातःपाद एकभक्तत्रयं सायंपादो नक्तत्रये अयाचितमयाचितत्र
यं त्रिरात्रमुपवासत्रयं अयाचितमयाचितत्रयं त्रिरात्रमुपवासत्रयं अयाचितपाद उपवासपादश्चेति
गलित्वार्धकृच्छ्रः नक्तपादरहितमवशिष्टं पादत्रयं पादोनकृच्छ्रः यदाह स एव सायंप्रातर्दिनार्धस्नात्वा
दोनं नक्तवर्जितमिति अर्धकृच्छ्रस्य प्रकारान्तरमाह स एव सायंप्रातस्तथैकैकं दिनद्वयमयाचितम्
दिनद्वयं च नाश्नीयात्कृच्छ्रार्धं तद्विधीयते अथ प्राजापत्यकृच्छ्रः याज्ञवल्क्यः यथाकथंचित्त्रिगुणः प्रा
जापत्योऽयमुच्यते यस्त्वोक्तो दिनचतुष्टयात्मकः पादकृच्छ्रः स एवाहमित्यनेन निर्दिश्यते अयं पादकृच्छ्रः
स एवायमित्यनेन निर्दिश्यते अयं पादकृच्छ्रो यथाकथंचित्त्रिगुणः प्राजापत्यो भवति यथाकथंचिदित्य
नेन चत्वारः पक्षाः उक्ताः एकभक्तेन नक्तेन तथैवायाचितेन च उपवासेन चैवायमित्यनतक्रमेणैकेभ

म॰
पा॰
२३७

तत्केषुचिद्ग्रन्थेष्वेवकामात्त्रिगुणंप्रोक्तमित्यादिवचनबलात् द्वादशवार्षिकादिद्वैगुण्यादियुक्तप्रायश्चित्तमपि
विधत्ते तेनप्रायश्चित्तेनेहलोकेव्यवहार्यत्वनित्यकर्मानुष्ठानप्रतिबंधकपापमात्रापनयनंभवति तथाचक
र्मस्वाधिकारसिद्धिर्हितकर्मणाप्रत्यवायाभावेनपापांतरेनोत्पद्यते अतःप्रायश्चित्तमस्तीति प्रायश्चित्तम
स्तीति प्रायश्चित्तास्तित्वप्रतिपादकवचनानामभिप्रायः परलोकेदर्शनमात्रापनायकप्रायश्चित्ताभावा
त् प्रायश्चित्तेनास्तीतिप्रायश्चित्ताभावप्रतिपादकवचनानामभिप्रायः अथकृच्छ्रादिलक्षणानि तत्रया
ज्ञवल्क्यः एकभक्तेननक्तेनतथैवायाचितेनच उपवासेनचैवायंपादकृच्छ्रःप्रकीर्तितः एकभुक्ते
नदिवामध्यकाले एककालभोजनेन तथारात्रावुक्तकालकृतभोजनेननक्तेन दिवारात्रौवाअप्रार्थितो
पनतभोजनेनायाचितेनपरकीयान्नस्यस्वीयान्नस्यचयाचनंनकुर्यात् गौतमः अथापरंत्र्यहंनकिं
चनयाचेदिति नरात्रौनदिवाभोजनमुपवासः एवंचतुरहसाध्यःपादकृच्छ्रः एकभक्तादौग्रासस
ख्यानियमःपराशरेणोक्तः सायंतुद्वादशग्रासाःप्रातःपंचदशास्मृताः चतुर्विंशतिरयाच्याःपरंनि
रशनंस्मृतमिति सायंनक्तेः प्रातःप्रातरेकभक्ते आपस्तंबस्तुप्रकारांतरेणाह सायंद्वाविंशतिर्ग्रासाः

२३७

वदंतिकर्मणाकरोतिइतिकामकृतेकामेकृतेमरणान्यशोनिवदंभिवातकंभवति तस्मादकामकृतेप्रायश्चि
त्तंकामकृतेनैवेकेइति देवलः यत्साद्दनभिसंधायपापकर्मसकृत्कृतम् तस्येयंनिष्कृतिःप्रोक्ताय
मैविद्भिर्मनीषिभिः विधेःप्राथमिकात्तस्माद्द्वितीयेद्विगुणंस्मृतम् तृतीयेत्रिगुणंप्रोक्तंचतुर्थेनास्ति
निष्कृतिः अभिसंधिकृतेपापेसकृत्वानेदंनिष्कृतिः अपरेनिष्कृतिंप्राहुरभिसंधिकृतेपिच अत्रकृ
ल्कृमितिविहितप्रायश्चित्तोपलक्षणंचतुर्थेनास्तिनिष्कृतिरित्यस्यायमर्थः अज्ञानाद्द्वितीयवारेकृ
तेपापेद्विगुणंप्रायश्चित्तं तथात्रिवारेत्रिगुणं एवंचतुर्वारेकृतेपूर्वन्यायेनचतुर्गुणप्रायश्चित्तेन
निष्कृतिर्न अपित्वधिकेनेतिकेचन अपरेतुचतुर्थेतुप्रायश्चित्तमेवनास्तीतिवदंति वयंतुब्रूमः
प्रथममभिसंधिकृतेमहापातकेद्वादशवार्षिकं द्वितीयवारे द्वे तृतीयवारे त्रीणिचतुर्थेचत्वारि
इतिद्वादशद्वादशवर्षाणिभवंति एतेचामाचरणाकालोविंशान्युत्तरशतंशरदोभवति एषावतआयुषो
भावात्कर्तुमशक्यत्वेनप्रायश्चित्तभावोनतुस्वरूपतएवप्रायश्चित्ताभावइति कास्तुचिद्धतिस्मृतिषुबुद्धि
पूर्वकंकृतेप्रायश्चित्तंनास्तीत्युक्तम् कास्तुचित्तुविद्यतेइति तत्रेयंव्यवस्थामरणांतिकंप्रायश्चित्तंमहापा

म॰
पा॰
२३६

तद्व्यतिरिक्तविषयं मरणान्तिकप्रायश्चित्तं कृतेह इह लोके प्रयोजनभावात्परलौकिकमेव प्रयोजनं कल्पनी
यम् तच्च पापपनोदनमेवेति मरणान्तिकैः पापैः मगाछेतीस्थितं छागलेयोपि प्रायश्चित्तसकामानांकामा
वाप्तौ न विद्यते उपपातकानां तु स्यात्तथा चाक्षोपघातेन अस्यार्थः कामावाप्तौ ज्ञानपूर्वकपापेन नरको
पभोगनिवारकं प्रायश्चित्तं न विद्यते उपपातकात्महननयोस्तु ज्ञानत्वेपि स्यादिद्यते एवेति आत्म
हननं मूर्धविषमद्रव्यणादिकृतेन यदि जीवति तदा प्रायश्चित्तं विद्यते अथ मृतस्तदा तद्धितेच्छुना कर्तव्यमि
त्युभयथापि प्रायश्चित्तं विद्यत इति न विरोधः मनुः अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः का
मकारकृतेप्याहुरेके श्रुतिनिदर्शनात् अकामतः कृतं पापं वेदाभ्यासेन शुध्यते कामतस्तु कृतं
मोहात्प्रायश्चित्तैः पृथक्पृथक् इन्द्रो यतीन् सालावृकेभ्यः प्रायच्छत् तमश्लीला वागभ्यवदत् स प्रजा
पतिमुपाधावत् तस्मा उपहव्यं प्रायच्छदित्यादिनिदर्शनम् अनेन स्वयं तात्पर्यार्थः सालावृ
केभ्यः श्वविशेभ्यो यतीन् बुद्धिपूर्वकं खादयितुं प्रदत्तवते इन्द्राय प्रजापतिरुपहव्याख्यं कर्म प्रा
यश्चित्तेन दत्तवान् तस्मात्कामकारकृतेपि प्रायश्चित्तमस्तीत्यर्थः हारीतः मनसा कल्पयति वाचा

तस्माद्धिस्वस्मात्स्नेहाल्लोभात्प्रमादाद्वाशुभंकृत्वासद्यः शौचंसमाचरेत् नह्यशुद्धानामयंलोकेनपरत्रस्मा
चार्य्याः ॥ एवंत्व्याह कर्म्मणामनसावाचायदभीक्ष्णंनिषेवते तदभ्यासोहरत्येवंःतस्मात्कल्याणमा
चरेदिति ॥ चण्डनिर्णोदनंतुल्यधिश्रयणादिनाउत्क्लेदनं श्रेणिराः प्रायोनामतपःप्रोक्तंचित्तं
निश्चयउच्यते तपोनिश्चयसंयुक्तंप्रायश्चित्तंविदुर्बुधाः पापंकृत्वाभिमन्येतनाहमस्मीतिपूरुषः
चिकीर्षेत्नैवकल्याणंश्रद्दधानोनसूयकः योमनःकर्मसंभूतमेनआविष्करोतियः विकर्मणानप्यमा
नःपापाद्विपरिमुच्यते उदयन्यद्वदादित्यस्तमःसर्वव्यपोहति तद्वत्कल्याणमातिष्ठन्सर्वपापंव्यपो
हति ॥ अत्रकल्याणशब्दः प्रायश्चित्तःकर्तव्यताविकल्पःपरः ॥ अत्रकामाकामकृतपापेषुप्रायश्चित्त
कर्तव्यताविकल्पः ॥ तत्रयाज्ञवल्क्यः ॥ प्रायश्चित्तैरपैत्येनोयदज्ञानकृतंभवेत् कामतोव्यवहार्यस्तु
वचनादिहजायते अज्ञानकृतमेनःब्रह्महत्यायांपापंप्रायश्चित्तैर्वक्ष्यमाणलक्षणैरपगच्छतिकामतः
ज्ञानकृतंमहापातकादिप्रायश्चित्तैर्नापैति अपितुप्रायश्चित्तकृतेवचनादिहलोकेव्यवहार्योभवती
त्यर्थः एतच्चकामकृतंमहापातकानांमरणान्तिकप्रायश्चित्तव्यतिरिक्तविषयं मरणान्तिकप्रायश्चि

त्वादोषमवाप्नुयुः एतेषामेव जंतूनां गर्भत्वमुपयांति नाः इति ॥ अथ प्रायश्चित्तकर्तव्यतानिर्णयः गौतमः
अथ खल्वयं पुरुषः पापेन कर्मणा यथैतदयाज्ययाजनाभक्ष्यभक्षणावद्यवदनशिष्टस्याक्रियाप्रतिषि
द्धसेवनमिति अत्र प्रायश्चित्तं कुर्यान्न कुर्यादिति मीमांसंते न कुर्यादित्याहुः नहि कर्म क्षीयत इति कु
र्यादित्यपरे पुनः स्तोमेनेष्ट्वा पुनः सवनमायांतीति विज्ञायते व्रात्यस्तोमेनेष्ट्वा तरति सर्वं पाप्मानं त
रति ब्रह्महत्यां योऽश्वमेधेन यजते अभिशस्ताभिशस्यमानेन याजयेदिति च शिष्टस्याक्रियाविहितस्या
करणान्नहि कर्म क्षीयत इति फलोपभोगमंतरेणेत्यर्थः कुर्यादित्यपरे मतमिति सिद्धांत इत्यर्थः पु
नःस्तोमेनेत्यादि श्रुत्युक्तेन प्रायश्चित्तरूपेण पुनःस्तोमेनेष्ट्वा पुनरपि सवने प्रातर्मध्यंदिनसायं सवन
साध्यकर्मण्यायांति तत्कर्मानुष्ठानयोग्या भवंतीत्यर्थः याज्ञवल्क्यः विहितस्याननुष्ठानान्निंदित
स्य निषेवणात् अनिग्रहाच्चेंद्रियाणां नरः पतनमृच्छति तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये
एवमस्यांतरात्मा च लोकश्चैव प्रसीदति हारीतः यथादौरुपलेदचारणनिर्णोदनप्रक्षालनादिभिर्वा
सांसि शुध्यंते एवं तपोयज्ञदानैः पापकृतः शुद्धिमुपयांति घ्मायमाना इवाग्नौ धातवो दोषेभ्यः

हविव्रूकर्त्तोछिद्रोष्ठः अवगोरगोलिह्वहस्तोमादृ्ग्रोवापितृग्रोवानेत्रेविहलः स्नुषागामीवानरहृषलः
स्थूलैकहूस्वः चतुष्पथमूत्रविसर्जनेम्रूत्रकृद्धीकन्यादोषकः षण्ढः ईर्षालुर्मेषकः पित्रविवादमोनो
पस्मारीस्मासापहारीअत्यंतदरिद्रोरत्नापहारीअनपत्यःविद्याविक्रयीपुरुषमृगीवेदविक्रयीद्वीपी
बहुयाजकोजलप्लवः अयाज्ययाजकोवराहः अनिमंत्रितभोजीवायसः मिष्टैकभोजीवानरः य
नत्तस्नोमान्मार्जारः कदलवहृदहृनात्स्वद्योतः दारकाचार्यामुखविगंधः पर्युषितभोजीक्रिमिः अ
दत्तादायीवलीवर्दः मत्सरीभ्रमरः अग्न्युत्सादीमण्डलकुष्ठी मृत्स्नाचार्यः श्वपाकः गोहर्त्तासर्पः
स्नेहापहारीक्षयी अन्नापहारीअजीर्णी ज्ञानापहारीमूकः चाण्डालिकागामनेजगरः प्रव्रजितामि
गमनेमरुपिशाचः सूद्रागमनेदीर्घकीटः सवर्णाभिगामीदरिद्रः जलहारीमत्स्यःक्षीरहारीबला
कः वार्धुषिकोगाहीनः अविक्रेयविक्रयीगृध्रः राजमहिषीगामीनपुंसकः राजाक्रोशकोगर्दभः गो
गामीनपुंसकः राजाक्रोशकोगर्दभः गोगामंडूकः अनध्यायेध्ययनेसृगालः परद्रव्यापहारीप
रप्रेष्य मत्स्यवेदगर्भवासीत्येतेन्मूर्धगामिनोनरकागामिनइत्यर्थः मनुः स्त्रियोप्येतेनकल्पनाद

म॰
पा॰
२३४

हृत्वाब्रह्मस्वमपहृत्यचअरण्येनिर्जलेदेशेभवतिब्रह्मराक्षसः हीनजातौप्रजायन्तेपररत्नापहारकाः प
त्रशाकंशिखीत्वाहृत्वागंधांछुछुन्दरिःशुभान् मूषकोधान्यहारीस्याद्यानमुष्ट्रः फलंकपिः जलंप्ल
वः पयः काकोगृहकारीह्युपस्करम् मधुदंशः फलंगृध्रोगांगोधाग्निंबकस्तथा श्वित्रीवस्त्रंश्वार
संतुचीरीलवणाहारकः प्रदर्शनार्थमेतत्तुमयोक्तंतेपकर्मणि द्रव्यप्रकाराहियथातथैवप्राणि
जातयः ॥ शौनकः ब्रह्महाकुष्ठीनेजस्वापहारीमण्डली देवब्राह्मणाक्रोशकःखलति गरदाग्निदा
वुर्मतौ गुरुप्रतिहन्तोपस्मारीगोघ्नश्चायःधर्मपत्नीमुक्त्वान्यत्रप्रवृत्तःसप्रवेधी प्राणिविशेषः ॥
कुणपीभगमदोदेवब्राह्मणस्वापहारीपाण्डुरोगीन्यासापहारीकाणः स्त्रीपण्योपजीवीषण्ढः को
मारदारगामीदुर्भगः मिष्टैकाशीवातगुल्मी अभक्ष्यभक्षकोगण्डमालीब्राह्मणीगामीनिर्बीजीकू
रकर्मीवामनोवस्त्रापहारीपतंगः शय्यापहारीक्षपणकः शंखशुक्त्यपहारीकपालीदीपाहारीकौ
शिकोशिकोमित्रध्रुक् लपीमातापित्रोराक्रोशकः खण्डकारकः इति ॥ वृद्धगौतमः ॥ अन्नत
वाक् पाल्कतोमुद्गः सेलमनवाक् जलोदरीदारगामीकूटसाक्षीश्लीपदीउच्छूनजंघाचरणः विवा

स्तिःउपपातपरः षण्ढः श्येनजीवीकालदन्तिकः पुत्रोपाध्यायएवच पुत्रउपाध्यायोयस्यसन्ताहृयाः पु
तसंव्यवहारीचप्राणिहिंसारतास्त्रयेवैतरण्यांनिपात्यंतेयेचवावेधुघातकाः ॥ इत्येवमादीन्यन्यान्यः
पिवाक्यानिअनुसंधेयानि ॥ अथकर्मविपाकाः ॥ याज्ञवल्क्यः ॥ महापातकजांघोरान्नरका
न्प्राप्यदारुणान् कर्मक्षयात्प्रजायंतेमहापातकिनस्त्विह मृगाश्वसूकरोष्ट्राणांब्रह्महायोनिमृ
च्छति खरपुक्कसवेणानांसुरापोनात्रसंशयः पुल्कसःप्रतिलोमनिषादेनशूद्र्यांजातः अम्बष्ठा
वैदेहकेनजातोवेनवेधः क्रिमिकीटपतंगत्वंस्वर्णहारीसमाप्नुयात् तृणगुल्मलतात्वंचक्रमा
द्गुरुतल्पगः ब्रह्महाक्षयरोगीस्यात्सुरापः श्यावदंतकः हेमहारीतुकुनखीदुश्चर्मागुरुत
ल्पगः योयेनसंवसत्येषांसतल्लिंगोभिजायते एतच्चाकामकारेकामकारेतुअन्यास्वपिद्वःखब
हुलास्तुतिर्यग्योनिषुसंसरति तथाचमनुः श्वसूकरखरोष्ट्राणांगाजाविमृगपक्षिणाम् चण्डाल
पुक्कसानांचब्रह्महायोनिमृच्छति याज्ञवल्क्यः अन्नहर्त्तामयावीस्यान्मूकोवागपहारकः धान्य
मिश्रोतिरिक्तांगः पिशुनः पूतिनासिकः तैलहृत्तैलपायीस्यात्पूतिवक्त्रस्तुसूचकः परस्ययोषितं

म॰
पा॰
२३३

मेद्योरेपद्यंतेपापकारिणः सर्वविक्रयकर्त्तारोमित्राणांभेदकारकाः निर्मर्यादाःक्रोधनाश्चकदर्यैश्वर्येसं
युताः कोटरेविनिपात्यंतेबंधुभद्याश्चवाजिनः दानोपभोगशून्यत्वंधनवत्वेकदर्यैश्वर्य्यं बंधुपीडाक
राबंधुभक्षाःवाणिजः निषिद्धवाणिक्कर्मकराः विप्रत्वेपतितेचौरमर्यादायश्चलंघ्यति विप्रत्वः
आचारशून्यः पुत्रादिपरांमुखोवा ॥ पतितोपिप्ररूपएव विप्रत्वादिविषयेमर्यादांयोनलंघयती
त्यर्थः [illegible]णाखोमृगग्रोगोद्भ्रश्चक्रिमिभंदंशंव्रजंतिते एकाकीमिष्टमश्नातिबंधयित्वासुहृत्सुतान् दा
रभृत्यातिथींश्चैवनयासंबंधिबांधवान् उत्सन्नपितृदेवेज्यः पशुघातीचयोमृषा लालवेनर्वके।
चौरैकूटकर्त्ताविप्रानमेने मानकर्तादीनांसर्वेषांकूटकर्त्तेतिविशेषणं देवब्राह्मणाविद्वेषोगुरूंयश्चा
मन्यते अवाक्छिराःप्रपद्यंतेयल्लोहदूषयतेचयः मांसमद्यंसुरांलाक्षांगांधान्वस्नेहानपयः विक्रीणा
तियपतान्निमत्रदूयवहंव्रजेत् आरामारामदाहीचदुष्टःपापकृदेवचः पतंतिरुधिरान्धेतुकृतघ्ना
दाम्भिकानराः शुष्कशमांनुयः कुर्यात्त्रिष्ठायगुरुदूषकः सीधुकृन्मधुकृद्दण्डीकर्मकारोनिरा
कृतिः दण्डीनिषिद्धदण्डग्राही कर्मेतिकर्मकाराधिष्ठाता निराकृतिस्त्वाध्यायः अतीदण्डदण्डह

२३३

स्ताः रौरवे कूटसाक्षी च यश्च मिथ्याभिशंसति ऊलग्राहेपदवादी स चाप्यत्र पतेन्नरः ऊलविध्वंसदे
हेतुभाण्डावादिकांश्च ऊलग्राहे ऊलज्ञाने च यः प्रमाणीकृतः ऊलज्ञोपि सन्यः पदं वदति स पदा
वादी युच्यते रौद्रे तु ब्रह्महा गोघ्नः सुरापो गुरुतल्पगः सुवर्णस्तेयकृद्यस्तु गरदश्चाग्निदायकः स्व
त्रियं यो नरो हन्यात्स्वकं व्रजते तु सः राजपत्नीं राजपुत्रं हत्वा राजभटान्नरान् तालके पच्यते सद्यो
वैश्यं हन्ति च यो नरः न्यासापहर्ता क्रमति विषमोपस्थकृन्तिषु नमकुम्भे स्वस्रगामी रौद्रो राज
भटाश्च ये उत्तमाधमधर्मेषोर्विपरीतप्रवर्तने हन्ति वैषम्यं राजभटाः राजबलात्परोपद्रवकारिणः
ते वन्हिकुम्भे पतन्ती स्पर्धः महाज्वाले दुहितरं स्नुषां गत्वा च मातरम् अजाविकः सौकरिकस्तेन अक्रो
धनो नरः रङ्गोपजीवी यस्तस्याशाकुनी ग्रामयाजकः अभक्ष्यभक्षो वांताशी विप्रो धर्मविवर्जितः अग
म्यागामी नरः हीनरङ्कं शवं लब्रजेत् ऊनहला दिनापदि पोषकः शाकुनी भोजनार्थे स्वऊलगोत्र
वर्त्तावांताशीतिकल्पतरौ. वेदविक्रयिणो ये च केचाविक्रयिणो नराः वेदानां दूषका ये च समयानां
च दूषकाः समयानां शास्त्राविरुद्धानां दूषकाः धर्मशास्त्राणां हेतुवादऊ[illegible]तूहलाः एते विहंग

यद्यत्कर्मनिषेवते तादृशेनशरीरेण तत्तत्फलमुपाश्नुते अथनरकाः शंवलिविनो कुम्भीपाकमहारौरवम
हारौरवकूटसाल्मलिसिलासंघातवज्रकण्ठकशयनान्यासिपत्त्रवनानि अयस्तुण्डाः पक्षिणः पूयशो
णितकर्दमाः केशकश्मलशैवालाः क्षारनद्यः ज्वलितांगारकुल्यास्तप्तकरम्भवालुकानिस्त्रिंशमुद्गरशति
पाताः सूचप्रतोदवेधाः अल्पोदकाः सान्तिगर्त्ताः प्रदीप्तायःपिण्डलोहकण्ठकशयनानि मकरपंज
राणिव[illegible]सहस्राणितीक्ष्णाग्रायग्राश्वसूलाः श्यावशबलौवज्रदंष्ट्रिणोनष्टोदकावैतरणी एवमुपक्षेप
नेपापकर्मणा इति याज्ञवल्क्यः॥ प्रायश्चित्तमकुर्वाणाः पापेषुनिरतेनराः अपश्चात्तापिनःकष्टान्ना
कान्यान्तिदारुणान् तामिस्रंलोहशंकुंचमहारौरवशाल्मली रौरवंकुड्मलंपूतिमृत्तिकंकालसूत्र
कम् संघातंलोहितोदंचसदंशंसंप्रतापनम् महानरककाकोलसंजीवननदीपथम् अवीचिमंधतामि
स्रंकुम्भीपाकंतथैवच असिपत्रवनंचोरंतपनंचैकविंशतिम् महापातकजैर्घोरैरुपपातकजैस्तथा
अन्विताःयान्त्यचरितप्रायश्चित्तानराधमाः॥ यमः सुरापोब्राह्मणहागोघ्नःस्वर्णस्तेयपकृन्नरः पतितैःस
हसंपर्कश्चकृतग्रोगुरुतल्पगः एतेपतन्तिसर्वेषुनरकेषुयथाक्रमशः महापातकसंयुक्तायुगान्तिष्ठन्तित्यघोरु

ष्यत्वंतुराजसाः तिर्यक्त्वंतामसानित्यमित्येषात्रिविधागतिः त्रिविधात्रिविधैषातुविज्ञेयागौणिकीगतिः
अधमामध्यमाग्र्याचकर्मविद्याविशेषतः स्थावराःक्रिमिकीटाश्चमत्स्याःसर्पाःसकच्छपाः पशवश्चमृ
गाश्चजघन्यातामसीगतिः हस्तिनश्चतुरंगाश्चशूद्राम्लेछाश्चगर्हिताः सिंहाव्याघ्रावराहाश्चमध्यमा
तामसीगतिः चारणाश्चसुपर्णाश्चपुरुषाश्चैवदाम्भिकाः रक्षांसिचपिशाचाश्चतामसीषूत्तमागतिः
झल्लामल्लानटाश्चैवपुरुषाश्शस्त्रवृत्तयः द्यूतपानप्रसक्ताश्चप्रथमाराजसीगतिः राजानःक्षत्रिया
श्चैवराज्ञांचैवपुरोहिताः वादयुद्धप्रधानाश्चमध्यमाराजसीगतिः गंधर्वागुह्यकायक्षाविबुधानु
चराश्चये तथैवाप्सरसस्सर्वाराजसेषूत्तमागतिः तापसायतयोविप्रायेचवैमानिकागणाः नक्षत्रा
णिचदैत्याश्चप्रथमासात्विकीगतिः यज्वानऋषयोदेवावेदाज्योतींषिवत्सराः पितरश्चैवसाध्याश्च
द्वितीयासात्विकीगतिः वेदवत्सरशब्दाभ्यांतदभिमानिन्योदेवतेलक्ष्यते ब्रह्माविश्वसृजोधर्मोमहान
व्यक्तमेवच उत्तमांसात्विकीमेतांगतिमाहुर्मनीषिणः महान्बुद्धिः अव्यक्तंप्रकृतिः एषसर्वः॥
समुद्दिष्टःस्त्रिप्रकारस्यकर्मणः त्रिविधःस्त्रिविधःकृत्स्नःसंसारःसार्वभौतिकः यादृशेनतुभावेन

म॰
पा॰
२३१

उक्तो धर्मस्त्वयानघ कर्मणां फलनिर्वृत्तिं शंस नस्तत्त्वतः परम् स तानुवाच धर्मात्मा महर्षीन्मानवो भृगुः अ
स्य सर्वस्य शृणुत कर्मयोगस्य निर्णयम् शुभाशुभफलं कर्म मनोवाग्देहसम्भवं कर्मजा गतयो नृणामु
त्तमाधममध्यमाः तस्येह त्रिविधस्यापि त्र्यधिष्ठानस्य देहिनः दशलक्षणयुक्तस्य मनो विद्यात्प्रवर्त्त
कम् त्रिविधस्य उत्तमाधममध्यमरूपगतिभेदेन भिन्नस्य वाङ्मनःकायलक्षणाधिष्ठानभेदेन त्र्यधिष्ठानस्य
वक्ष्यमाणपरद्रव्याभिध्यानादिरूपदशलक्षणोपेतस्य वक्ष्यमाणपरद्रव्याभिध्यानादिरूपदशलक्षणो
पेतस्य एवंविधस्य देहिनो मनः प्रवर्तकं विद्यात् दशलक्षणान्येवाह परद्रव्येष्वभिध्यानं मनसानि
ष्टचिन्तनम् वितथाभिनिवेशश्च त्रिविधं कर्म मानसम् पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः असंबद्धप्रला
पश्च वाङ्मयं स्याच्चतुर्विधम् अदत्तानामुपादानं हिंसा चैवाविधानतः परदारोपसेवा च कायिकं त्रि
विधं स्मृतम् मानसं मनसा चैवमुपभुङ्क्ते शुभाशुभम् वाचा वाचाकृतं कर्म कायेनैव च कायिकम् शरी
रजैः कर्मदोषैः याति स्थावरतां नरः वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् तथा च मनुः येन ये
न गुणेनैषां संसारान्प्रतिपद्यते तान्समासेन वक्ष्यामि सर्वस्यास्य यथाक्रमम् देवत्वं सात्त्विका यान्ति मनु

२३१

धनस्यैव बृहस्पतिः विभक्ताद्यविभक्ता वा दायादाः स्थावरे समाः एको ह्यनीशः सर्वत्र दानाधमनविक्रये
आधमनमस्वीकरणम् एतच्च व्यवहारसौकार्याभिप्रायेण न तु पृथक् स्वत्वाभावाभि[प्रा]येण विभागे
णैव पृथक्स्वत्वात् ॥ इह मदनपारिजाते मदनह्निनिपालदानजलचूडैस्तवकल्पद्रुम आसीद्दामोदा
कृष्टपाणिनश्च रः अभिहिता वर्णाश्रमधर्माः ॥ अथेदानीं तदुल्लङ्घनजनितदुरितापूर्वोपहरणहे
तुभूताः प्रायश्चित्तापरपर्यायो नैमित्तिकधर्मोऽभिधीयते तत्र तावच्चरोचनार्थं पापकर्मफलादि प्र
दर्श्यते ॥ हारीतः अभक्ष्यभक्षणमभोज्यभोजनमपेयपानमयाज्ययाजनमसत्प्रतिग्रहः पर
दाराभिगमनं परद्रव्याभिहरणं प्राणिहिंसा चेति शारीराणि पारुष्यमनृतं विवादः श्रुतिविक्रयश्चेति
वाचिकानि परोपतापनं पराभिद्रोहं क्रोधो लोभो मोहोऽहंकारश्चेति मानसानि तदेतद्दशधा नैरयाणि
कर्माणि करोति शुभाशुभानि तानि तानि तस्मिंस्तस्मिन्वयसि शारीरवाचिकमानसान्यश्नोति एवं ह्या
ह० यस्यां यस्यामवस्थायां यत्करोति शुभाशुभम् शरीरवाङ्मयास्संचतस्यां तस्यामवाप्नुयात् शारीरै
णानु शारीरं वाङ्मयेनक्रवांमयं मानसं मनसा चैव स्वकर्मफलमश्नुते मनुः चातुर्वर्ण्यस्य कृत्स्नोय

गानर

स्मृतः सुमुद्दितार्थैः स्वकृषिवाणिज्यादिना संवर्धने पितृकृते सर्वेषां समएव विभागः नार्जकस्य स्वोभागो वि
त्यर्थः अथ सर्वविभागविशेषः तत्र याज्ञवल्क्यः अन्योन्यापहृतं द्रव्यं विभक्ते यद्दिदृश्यते तत्पुनस्ते समै
रंशैर्विभजेरन्निति स्थितिः विभागानंतरमन्योन्यापहृतं द्रव्यं यद्विज्ञातं समैरेवांशैर्विभजेरन् नज्येष्ठ
स्यविंशोद्धारइति विषमोद्धारक्रमेणेत्यर्थः तथा विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः विभाग
नंतरं कालांतरे विभागो न जात इत्यपलापे कृते ज्ञातिभिः पितृबंधुभिर्मातृबंधुभिर्मातुलादिभि
रुक्तलक्षणैः साक्षिभिः लिखितेन विभागपत्रेण च विभागसंभावना निर्णयो विज्ञेयः पृथक्कृष्यादि
प्रवर्तितं तत्पृथक्त्वं च महायज्ञाद्यनुष्ठानेन च विज्ञेय इत्यर्थः नारदः विभागधर्मसंदेहे दायादा
नां विनिर्णयः ज्ञातिभिर्भागलेख्येन च पृथक्कार्यप्रवर्तनात् भ्रातृणामविभक्तानामेको धर्मः प्रवर्त
ते विभागे सति धर्मोपि भवेत्तेषां पृथक्पृथक् साक्षित्वं प्रतिभाव्यं च दानं ग्रहणमेव च विभक्ता भ्रा
तरः कुर्युर्नाविभक्ताः कथंचन तथा यद्येकजाता बहवः पृथग्धर्माः पृथक्क्रियाः पृथक्कर्मगुणो
पेता न चेत्कार्येषु संगताः स्वभावान्नपि दद्युस्ते विक्रीणयुरथापि वा कुर्युर्यथेष्टं तत्सर्वमीशास्ते स्व

ब्धलाभहेतुभूतं श्रौतस्मार्ताग्निसाध्यमिष्टं कर्मयोगशब्देनलक्ष्यते लब्धस्यपरिरक्षणं क्षेमः लब्धरक्षणका
रणाभूतं बहिर्वेदितडागारामनिर्माणादिमूर्त्तं कर्म क्षेमशब्देनलक्ष्यते एतदुभयमपैतृकमपिनविभाज्यं
क्षेमं पूर्तं योगमिष्टमित्याहुः तत्त्वदर्शिनः अविभाज्येचतेप्रोक्तेशयनासनमेवचेतिलौगाक्षिस्मरणा
त् ॥ योगक्षेमकारिणो मंत्रिपुरोहितादयोयोगक्षेमशब्देनोच्यंतेइत्यन्ये वस्त्रचामरछत्रोपानत्प्रभृ
तयइत्यपरे प्रचारोगृहारामादिप्रवेशनिर्गमनमार्गः अस्मिन्प्रकरणेविषमत्वंनामभागदानापर्या
प्तत्वं नत्वेकपत्न्यादिसंख्याभिः तद्यथा चत्वारः पुत्रास्त्रयोऽश्वा तत्राश्वांशचतुष्टयापर्याप्तत्वाद्वैष
म्यं यत्त्वबृहस्पतिवचनांतरम् अविभाज्यंसगोत्राणामासहस्रकुलादपि याज्यंक्षेत्रंचपत्रंचकृतान्नमुदकंस्त्रि
यः तद्ब्राह्मणजातदासस्त्रियादिशुद्धविषयम् नप्रतिग्रहभूर्देयादासस्त्रियादिशुद्धविषयम् नप्रतिग्रह
भूर्देयादासस्त्रियायस्तुतायवै इतिविशेषस्मरणात् याज्ययाजनलब्धं प्रार्थ्यादिप्रामसमविभाज्यमितिमुक्तं
तत्रापवादमाह व्यासः साधारणंसमाश्रित्ययत्किंचिद्वाहनादिकं शौर्यादिनाप्रतियंतेभ्रातरस्त
त्रभागिनः साधारणंसमुद्दितद्रव्यंसमाश्रित्य याज्ञवल्क्यः ॥ सामान्यार्थसमुत्थानेविभागोसमपः

यदुपविष्टस्यावस्थानं तथा अनेनविधिनावस्तुगोघ्नोगामनुगच्छतिसगोहत्याकृतंपापंत्रिभिर्मासैर्व्यपोहति वृष
भैकादशागाश्चदद्यात्सुचरितव्रतः अविद्यमानेसर्वस्वंवेदविद्भ्योनिवेदयेदिति एतच्चकामतोब्राह्मणकीयशोमात्र
वधे अत्राहारांतरानभिधानात्कन्दमूलादिनावर्जनंयथासिद्धं अथवानेनविधिनेत्यनेनतस्यैवोक्तद्वैमासिकेतिकर्त्त
व्यतानिर्देशः चतुर्थकालमश्नारलवणमित्युक्तरीत्याशरीरयात्राकर्त्तव्या वृषभैकादशगोदानासमर्थः स
र्वस्वदानंकुर्यात् यदातुब्राह्मणस्यगांप्रक्षितातृणपादिगुणोपेतमकामतोव्यापादयतितदांगिरसोक्तप्रका
रेणत्रैमासिकं पूर्वोक्तरीत्यात्क्षत्रियगोव्यापादनेतेनैवसात्ताउक्तंद्वैमासिकंकार्यंएवंवैश्यादिसंबंधिगोवधेप्रा
यश्चित्तमधिकमूह्यं अंगिराः उपपातकसंयुक्तोगोघ्नोमासंयवान्पिबेत् अस्यचविषयःपूर्वोक्तपैठीन
सिवाक्यविषयेदर्शितः तथाचअक्षारलवणान्भक्तान्यष्टकालेमिताशनः कृतवापोवसेद्गोष्ठेचर्मणाते
नसंवृतः मासद्वयंचनियतोगोमूत्रस्नानसंयुतः पानशौचक्रियांचैवअन्यांकुर्वीतकेवलं व्रतवद्धार
येद्दण्डमजिनंमेखलांतथा गाश्चैवानुव्रजेद्युक्तोरोगस्तासांपिबेत्तथा गोमतींचजपेद्विद्यामोंकारं
वेदमेवच वृषभैकादशागाश्चदद्यात्सुचरितव्रतः अविद्यमानेतल्लिंगांतद्वर्णांवापिदापयेदिति अ

नापवित्रहिंसित्वाकार्यं यदाहमनुः हिंसायोयस्यद्रव्याणिज्ञानतोऽज्ञानतोपिवा सततस्योत्पादयेत्तुष्टिंराज्ञेद
याच्चतत्सममिति राज्ञेतत्समद्रव्यदानंदण्डः यदातज्जातिमात्रब्राह्मणस्वामिकंगोमात्रंकामतः प्रमापयति
तत्रकन्दमूलादिनाशरीरयात्रांकुर्वन्वृषभैकादशगोदानसहितंत्रैमासिकंकुर्यात् कामतस्त्वादशरात्रि
यगोवधेनमासद्वयंचतुर्थकालेहविष्यंभुंजीत कामतस्त्वाहृग्वैश्यगोवधेमासंयवागूपानंकुर्यात् तथा
चमनुः उपपातकसंयुक्तोगोघ्नोमासंयवान्पिबेत् अत्रयवशब्दोयवाम्बादिविकारपरः एतत्शूद्रकीयगो
हननविषयं तथा कृतवापोवसेद्गोष्ठेचर्मणातेनसंवृतः चतुर्थकालमश्नीयादक्षारलवणंमितं गोमूत्रेण
चरेत्स्नानंद्वौमासौनियतेंद्रियः दिवानुगच्छेद्गास्तास्तुतिष्ठन्नूर्ध्वंरजः पिबेत् शुश्रूषित्वानमस्कृत्वारात्रौवीरास
नंवसेत् तिष्ठतीष्वनुतिष्ठेत्तुव्रजंतीष्वप्यनुव्रजेत् आसीनासुतथासीनोनियतोवीतमत्सरः आतुरामभि
शस्तांवाचोरव्याघ्रादिभिर्भयैः पतितांपंकलग्नांवासर्वप्राणैर्विमोचयेत् उष्णेवर्षतिशीतेवामारुतेवातिवा
भृशं नकुर्वीतात्मनस्त्राणंगोरकृत्वातुशक्तितः आत्मनोयदिवान्येषांगृहेक्षेत्रेथवाखले भक्षयंतींनकथयेत्
पिबंतींनैववत्सकमिति एतच्चकामतःस्वसंबंधिगोत्रमात्रव्यापादने वीरासनं भित्तिशय्यादावनिषद्य

हरइतिकाश्यपोक्तंद्रष्टव्यं यानिचविज्ञानेश्वरादिभिरीरितानिव्रतानि गोघ्नस्यपंचगव्येनमासमेकंकल्पत्रयंप्रत्यहंस्यात्पराको
वाचान्द्रायणमथापिवेति एतान्यस्मिन्नेवविषयेयोज्यानिएवमन्यान्यपिमाससाध्यान्यत्रैवयोज्यानिअत्र मत्यावेश्यसंबं
धिगोमात्रव्यापादनेमासमतिकृच्छ्रंकुर्यात् यत्तुशंखः गोघ्नःपंचगव्याहारःपंचविंशतिरात्रमुपवसेत् सशिखंव प्या२
पनंकृत्वागोचर्मणाप्रावृतोमासमनुगच्छन् पोष्टेशयेगांचदद्यादिति तस्मिन्नेवविषये अस्मिन्नेवपंचविंशति
रा रात्रंपंचगव्याशासमर्थः काश्यपोक्तंकुर्यात् षष्ठेकालेपयोभक्तोवागच्छंतीष्वनुगच्छेत् तासुसुखोपविष्टासुनो
पविशेत् नातिलंबंगच्छेन्नातिविषमेनावतारयेन्नाल्पोदकेस्नावयेदंतेब्राह्मणान्भोजयित्वातिलधेनुंदद्यादिति
अत्रमासमित्यनुवर्तते षष्ठेकालेत्युपवासेरशक्तौ अत्राप्यशक्तौपैठीनसुक्तंकुर्यात् गोघ्नोमासंयवाशूप्रसृत
तंडुलस्थितोभुंजानोगोभ्यःप्रियंकुर्वन् मुच्यतीति शूद्रस्वामिकगोवधे मासप्राजापत्यंकुर्यात् यत्तुबृहस्पतिः
द्वादशरात्रंपंचगव्याहारइति यच्चसंवर्तः सक्तुयावकभिक्षाशीपयोदधिघृतंसकृत् एतानिक्रमशोश्नीयान्मा
सार्धंतुसमाहितः ब्राह्मणान्भोजयित्वातुगांदद्यादात्मशुद्धयेइतिइत्यादीन्यन्यान्यपिएतत्समानिशूद्रस्वामिकगोह
नएवयोज्यानि अथवाब्राह्मणादिवर्णत्रयसंबंधिमृतकल्पगोहननविषयेवायोज्यानि एतच्चगोस्वामिनोद्रव्यादि

कभार्यत्वंहीनयोनिनिषेवणंबाहुल्येन परान्नोपजीवनंपरान्नपरिपुष्टत्वाश्रमः शास्त्रस्यवेदविरोधिनोधिगमः एतानि
प्रत्येकमुपपातकानि अथगोवधप्रायश्चित्तं याज्ञवल्क्यः पंचगव्यंपिबन्गोघ्नोमासमासीत संयतः गोष्ठेशयोगोनुगामीगोप्र
दानेनशुद्ध्यति कृच्छ्रंचैवातिकृच्छ्रंचपिबेद्वापिसमाहितः दद्यात्त्रिरात्रंवोपोष्यवृषभैकादशास्तुगाः अत्रव्रतचतुष्ट
यंविहितं आहारांतरनिरपेक्षेणपंचगव्यंपिबन्गोघ्नोगोमालायांशयानः प्रातस्तायत्प्रवर्तनंगच्छतीनन्वगच्छन् तिष्ठं
तीरनुतिष्ठन् अन्यैरपिनियमैर्युक्तोमासमासीत ततोमासांतेब्राह्मणायगांदत्त्वाशुद्ध्यतीत्येकंव्रतं पंचगव्याहारव्यतिरेके
णपूर्वोक्तधर्मयुक्तोमासंप्राजापत्यकृच्छ्रंचरेदितिद्वितीयं तथैवप्राजापत्यस्थानेतिकृच्छ्रंचरेदितितृतीयं त्रिरात्रोप
वासंकृत्वैकंवृषंदशगाश्चदद्यादितिचतुर्थंअत्रैवंव्यवस्था अज्ञानतोजातिमात्रब्राह्मणसंबंधिगोमात्रवधेदद्यात्त्रि
रात्रंवोपोष्यवृषभैकादशास्तुगाइति अज्ञानतःक्षत्रियसंबंधिगोमात्रवधेपंचगव्यंपिबन्गोघ्नोमासमासीतिसंयतः
गोष्ठेशयइत्यादि चतुरुपवासाएकप्राजापत्यस्थानेप्राजापत्याम्नायएकागौः एवंचमासंपंचगव्याशनेपंचधेनवोभ
वंति तदंतेदीयमानैकागौरितिषट् धेनवःततश्चवृषभैकादशगोदानसहितत्रिरात्रोपवासापेक्षयामासंपंचग
व्याशनंन्यूनमितिक्षत्रियगोहननविषयंगोहत्यातच्चर्मणाप्रावृतोमासंगोष्ठेशयस्त्रिषवणस्नायीनित्यंपंचगव्या

मासं

चष

गोवधोव्रात्यतास्तेयमित्यनेनैवाधान्यादि॰ सिद्धतासिद्धो पुनर्ग्रहणमधिकदोषत्वख्यापनार्थमेवम
न्यदपि पुनर्ग्रहणं व्याख्येयं अयाज्यानां शूद्रपतितादीनां याजनं पित्रादीनामपि तानां त्यागो गृ॰
हाग्निष्कासनमरुत्तणां वा तडागारामविक्रय इति सर्वधर्मविक्रयप्रदर्शनार्थं अंगुल्यादिनायोनि
विदारणं तद्दोषख्यापनं वा कन्याद्दूषणं कन्यासंभोगेन गुरुतल्पसमत्वमेव कौटिल्यं गुरोरन्यत्र
गुरौ तु कौटिल्यं सुरापानसमं पुनर्व्रतलोपो यादानं शास्त्राविरुद्धशिष्टाद्दत्ताविस्रसन्दर्शनात्स्व
र्वेतां म्लेन भक्षयामीत्यादिव्रतलोपस्यास्योपपातकत्वप्रासंगंर्थं क्रियारम्भः पाकक्रियारंभः मद्य
पायाः स्वस्त्रियास्त्रपि उपभोगः स्वाध्यायत्यागः सः शास्त्राभ्यासविष्टत्वेन कुडम्भपोषणत्वप्रत
याचापरित्यागः अग्नीनां श्रौतानां स्मार्तानां सुतस्यापत्यस्य जातकर्मादिसंस्काराकरणं पाका
दिदृष्टप्रयोजनमार्थमस्तुष्कद्रुमच्छेदः स्त्रीहिंसौषधिजीवनं भार्यावेश्यात्वकरणेन प्राणिविधेन
वशीकरणयोगौषधेन च जीवं तिलेत्तुभप्रतिपीडनयंत्रैर्हिंसत्व यानस्य गयादीन्यष्टादशव्यसना
नि हीनसंख्यजातितो गुणतश्च हीनानां मैत्री अमूढसवर्णदारस्य केवलहीनवर्णापयमस्तदे

व्र्णाव्यतिरिक्तस्यचौर्यं सुवर्णास्तेयंतस्मव्यतिरिक्तसचऋणानामनपक्रियायज्ञप्रजोत्पादनस्वाध्यायाध्या
पनानामकरणसत्यधिकारे तथैवान्नमवर्णाहृहीनस्यसुवर्णादेयप्रदानमपि ऋणानामनपक्रियाऽ
धिकारेसत्यनाहिताग्नित्वंअपण्यानांप्रतिषिद्धविक्रियाणांलवणादीनांविक्रयः दाराग्निपरिग्रहयो
र्ज्येष्ठमतिक्रम्यकनीयसोऽधानस्तत्स्वीकारः परिवेदनं पाणपूर्वाध्यापकोभृतोभृतकस्ततो
ध्ययनादानंशिष्यस्य ताहशाध्यापनंगुरोः गुरुतल्पमव्यतिरिक्तंपारदार्यं ज्येष्ठस्याविवाहात्पूर्वमे
व कनिष्ठेकृतविवाहेज्येष्ठोदिवाहरहितः परिवित्तिस्तस्यभावः पारिवित्त्यं धान्यहृद्युपजीव
शिविद्धस्य नंचवार्द्धुष्यं लवणस्योत्पादनंलवनक्रिया एतच्चवानप्रस्थव्यतिरिक्तस्यलवणंचस्वयंकृतमिति जस्य ५
धुपत्रिवेत ५ मनुनोपदेशात् अग्निहोत्रिणोत्रयीसवनस्याव्यतिरिक्तोलज्जैवेश्ययोः शूद्रस्यप्रत्येकवधः अनि
षिद्धविक्रयस्यापिपण्यस्यनिन्द्यार्थोपजीवनं अराजस्यापितार्थोपजीवनं नास्तिदेवतंनास्तिप
रलोकइतिबुद्धिर्नास्तिकः ब्रह्मचारिणः स्त्रीसंसर्गेव्रतलोपः ब्रह्महत्यादिप्रायश्चित्तस्यप्र
क्रान्तस्यपरित्यागश्च सन्तानामपत्यानांविक्रयः धान्यंब्रीह्यादिकुप्यंत्रपुसीसादियस्वर्गवादिः

प्र॰ पा॰
२८७

तानि अत एव महापातकान्न्यूनानि उपपातकादधिकानि तस्मान्महापातकप्रायश्चित्तप्रकरणमेव तत्सम
मदतीति दिक् प्रायश्चित्तानामभिधानायाधुनोपपातकप्रायश्चित्तं वक्तुं तत्स्वरूपमुच्यते तत्र याज्ञवल्क्यः गोव
धो व्रात्यता स्तेयमृणानां चानपक्रिया अनाहिताग्नितापण्यविक्रयः परिवेदनं भृताद्ध्ययनादा
नं भृतकाध्यापनं तथा पारदार्यं पारिवित्त्यं वार्द्धुष्यं लवणक्रिया स्त्रीशूद्रविट्क्षत्रवधो निन्दितार्थोप
जीवनं नास्तिक्यं व्रतलोपश्च सुतानां चैव विक्रिया धान्यकुप्यपशुस्तेयमयाज्यानां च याजनं पि
तृमातृसुतत्यागस्तडागारामविक्रयः कन्यासंदूषणं चैव परिविन्दकयाजनं कन्याप्रदानं तस्यैव
कौटिल्यं व्रतलोपनं आत्मनोर्थे क्रियारंभो मद्यपस्त्रीनिषेवणं स्वाध्यायाग्निसुतत्यागो बांधवत्या
ग एव च इन्धनार्थं द्रुमच्छेदः स्त्रीहिंसौषधजीवनं हिंस्रयंत्रविधानं च व्यसनान्यात्मविक्रयः शूद्रप्रेष्यं
हीनसख्यं हीनयोनिनिषेवणं तथैवानाश्रमेवासः परान्नपरिपुष्टता असच्छास्त्राभिगमनमाकरे
ष्वधिकारिता भार्याया विक्रयश्चैषामेकैकमुपपातमिति व्रात्यता सावित्रीपतितत्वं स्तेयं ब्राह्मणस्व

प्रायया जनं अध्यापनं स्वर्वं वदे ववेदांगाध्यापनं योनिसंबंधोडुहितृभगिन्यादिव्यतिरिक्तः एवं कल्पना
यांमूलं प्रकृष्टयाजनाद्यैः सद्यः पातित्यकथनमेव यत्रत्वनेकनिमित्तानुप्रवेशस्तत्रप्रतिनिमित्तं नै
मित्तिकामावर्ततइति यावंति निमित्तानि तावंति नैमित्तिकानि तद्यथा पतितां गुरुभार्यां स्वजनस्व
लामभ्यक्तमभ्यक्तो कल्याशरणागतां सगोत्रामम वस्यायां दिवाजननसमर्त्ते श्राद्धकृडुच्छिष्टः संगच्छ
तइत्यादि यत्रयद्धिनायन्निवर्तते तत्रप्रधानप्रायश्चित्तेनैव नांतरीयसिद्धानामपिनिष्कृतिर्भवति त
द्यथा ब्राह्मणो हननेक्रियमाणो हननेच्छातः महद्भिः शास्त्रायुधमन्नमित्यादीनि अत्रयद्यपिब्रह्महादि
षु मरणांतिकमनुपदिष्टं तथापि तत्संसर्गिषु तन्नसत्तस्यैवव्रतं कुर्यादिति व्रतस्यैवातिदेशात् मर
णांतव्रतप्राशस्त्येन हृद्धाः प्रयुंजते एवमनुपपातकादिसंसर्गेपि तत्तत्प्रायश्चित्ता ` ` ` ` न्यतिदेष्टव्या
नि तत्रापि ज्ञातिशक्त्याद्यपेक्षया योज्यानि इतिमहापातकप्रायश्चित्तानि अतिदिष्टान्यतिपातका
नीति पर्यायः समान्यनुपपातकानि पातकानीति पर्यायः एतानि महापातकोपपातकमध्यस्थ

त्वत्संसर्गविशुद्धयेइति अत्रापिजातिशंकायां पतितया तत्संसर्गेण तत्प्रायश्चित्तानि गुरूणि लघूनि च योज्या
नि अकामतः संवत्सरं वत्सरात्तु न संसर्गे पराशरः संसर्गमाचरन्विप्रः पतितादिष्वकामतः पंचाहं वा द
शाहं वा द्वादशाहमथापिवा मासार्धमासमेकं वा मासत्रयमथापिवा अब्दार्धमब्दमेकं वा भवेदूर्ध्वं तत
स्तमः त्रिरात्रं प्रथमे पक्षे द्वितीये कृच्छ्रमाचरेत् चरेत्सांतपनं कृच्छ्रं तृतीये पक्ष एव तु चतुर्थे दशरात्रं स्यात्
पराकं पंचमे ततः षष्ठे चान्द्रायणं कुर्यात्सप्तमे चैन्दवद्वयं अष्टमे च तथा पक्षे षाण्मासं कृच्छ्रमाचरेदिति
कामतः पतितसंसर्गे तु विशेषः पंचाहे तु चरेत्कृच्छ्रं दशाहे तप्तकृच्छ्रकं पराकं त्वर्धमासे स्यान्मासे चान्द्रा
यणं चरेदिति मासत्रये तु कुर्वीत कृच्छ्रं चान्द्रायणोत्तरं षाण्मासिके तु संसर्गे कृच्छ्रं त्वब्दार्धमाचरेत्
संसर्गे त्वाब्दिके कुर्यादब्दं चान्द्रायणं नर इति संपूर्णे त्वाब्दिक इति क्वचित्तु न आब्दिक इत्यर्थः संपू
र्णाब्दिकसंसर्गे मन्वादिभिर्द्वादशवार्षिकस्योक्तत्वात् बृहस्पतिः षाण्मासिके तु संसर्गे भोजनाध्या
पनादिना एकत्रासनशय्याभिः प्रायश्चित्तार्धमाचरेदिति अत्र भोजनाध्यापनयोरेकपात्रभो
जनैः षाण्मासे संसर्गे प्रायश्चित्तार्धमुक्तं अस्यायं विषयः याजनमात्राकामतोत्यंतापदि पंचयज्ञा

८ प्रायायाजनं अध्यापनं सर्वं वं देववेदांगाध्यायनं योनिसंबंधो दुहितृभगिन्यादिव्यतिरिक्तः एवं कल्पना
यां मूलं प्रकृष्टयाजनाद्यैः सद्यःपातित्यकथनमेव यत्र त्वनेकनिमित्तानुप्रवेशस्तत्र प्रतिनिमित्तं नै
मित्तिकामावर्ततइति यावंति निमित्तानि तावंति नैमित्तिकानि तद्यथा पतितां गुरुभार्यां रजस्व
लामभ्यक्तमभ्यक्तो कल्याणशरणागतां सगोत्राममवस्थायां यादिवाजनसमक्षं श्राद्धकृदुच्छिष्टः संगच्छ
तइत्यादि यत्र यद्विनायन्निवर्ततेतत्र प्रधानप्रायश्चित्तेनैव नांतरीयसिद्धानामपिनिष्कृतिर्भवति न
घयाब्राह्मणहनने क्रियमाणे हननेच्छा ततः प्रहर्त्तिः शस्त्राद्युद्यमनमित्यादीनि अत्र यद्यपि ब्रह्महादि
षु मरणांतिकमनुपदिष्टं तथापि तत्संसर्गिषु तन्नसततस्यैव ब्रतं कुर्यादिति ब्रतस्यैवातिदेशात् मरा
णांतब्रतशब्देन ग्रहाः प्रयुज्यते एवमनुपपातकादिसंसर्गेपि तत्तत्प्रायश्चित्त .... न्यतिदेष्टव्या
नि तत्रापि जातिशक्त्याद्यपेक्षया योज्यानि इति महापातकप्रायश्चित्तानि अतिदिष्टान्यतिपातका
नीति पर्यायः समान्युपपातकानि पातकानीति पर्यायः एतानि महापातकोपपातकमध्यस्थि

तत्संसर्गी विशुद्ध्येदिति अत्रापि जातिशक्त्यादि पतत्या तत्तत्संसर्गे तत्तत्प्रायश्चित्तानि गुरुणि लघूनि च योज्या
नि अकामतः संवत्सरं वत्सरार्द्धं तु संसर्गी पराशरः संसर्गमाचरन् विप्रः पतितादिष्वकामतः पंचाहं वा द
शाहं वा द्वादशाहमथापि वा मासार्द्धमासमेकं वा मासत्रयमथापि वा अब्दार्द्धमब्दमेकं वा भवेदूर्ध्वं तु त
त्समः त्रिरात्रं प्रथमे पक्षे द्वितीये कृच्छ्रमाचरेत् चरेत्सांतपनं कृच्छ्रं तृतीये पक्ष एव तु चतुर्थे दशरात्रं स्या
त्पराकं पंचमे ततः षष्ठे चान्द्रायणं कुर्यात्सप्तमे चैन्दवद्वयं अष्टमे च तथा पक्षे षाण्मासं कृच्छ्रमाचरेदिति
कामतः पतितसंसर्गे तु विशेषः पंचाहे तु चरेत्कृच्छ्रं दशाहे तप्तकृच्छ्रकं पराकं त्वर्धमासे स्यान्मासे चान्द्रा
यणं चरेदिति मासत्रये तु कुर्वीत कृच्छ्रं चान्द्रायणोत्तरं षाण्मासिके तु संसर्गे कृच्छ्रं त्वब्दार्धमाचरेत्
संसर्गे त्वाब्दिके कुर्यादब्दं चान्द्रायणं नर इति संपूर्णे त्वाब्दिक इति क्वचित् न्यून आब्दिक इत्यर्थः संपू
र्णाब्दिकसंसर्गे मन्वादिभिर्द्वादशवार्षिकस्योक्तत्वात् बृहस्पतिः षाण्मासिके तु संसर्गे भोजनाध्या
पनादिना एकत्रासनशय्याभिः प्रायश्चित्तार्धमाचरेदिति अत्र भोजनमध्यापनयोरेकपात्रभो
जनेः षाण्मासंसर्गे प्रायश्चित्तार्धमुक्तं अस्यायं विषयः याजनमात्राकामतोऽसंतापदिद्वेपि च यज्ञा

मौख्यैस्तु संबंधैः सद्य एवेति एकभोजनमेकपंक्तिभोजनं नत्वेकमत्रभोजनं तत्र देवलेन सद्यः पातित्यस्यो
क्तत्वात् याजनं यौनसंबंधं स्वाध्यायं सहभोजनं कृत्वा सद्यः पतत्येव पतितेन न संशय इति मुखभवं मुख्यम
ध्यापनं ननु यौनस्रौतमुख्यैरिति द्वंद्वनिर्देशान्मिश्रितानामेव सद्यः पातनहेतुत्वमुक्तं मैवं यः पतितैः
सह यौनमौखस्रौतानां संबंधमन्यतमसंबंधं कुर्यात् तस्याप्येतदेव प्रायश्चित्तमिति स्मृतं तन्नाप्रत्येककरणे द्वा
दशवार्षिकाभिधानात् मौख्यसंबंधोऽध्यापनं एकयानादीनां चतुर्णां समुदितानामेव पतनहेतुत्वं एकयान
भोजनासनशयनैरिति येन त्रयोगानिर्देशात् याज्ञवल्क्यः पतितैस्तु संवसेद्यो वै वत्सरं सोऽपि तत्समः कन्यां स
मुद्वहेदेषामेकवासामकिंचनां कन्यां पतितावस्थायामुत्पन्नां हडहारीतः पतितस्य कुमारीं विवस्त्रामे
करात्रोपोषितां प्रातः शुक्लेनाहतेन वाससाच्छादितां नाहमेतेषां न ममैते इति त्रिरुच्चैरभिधानां तीर्थे स्वगृहे
वा तद्वहेदिति वसिष्ठः पतितेनोत्पन्नः पतितो भवति अन्यत्र स्त्रियाः सा हि परगामिनी तामरिक्थामुपेया
देति संवत्सरेण पतितो भवतीति यद्यप्यतिदेशातः प्रायश्चित्तं प्राप्तं तथापि द्वादशवार्षिकं संसर्गिणामेव कार्यं
महापातकत्वात् अनेनैवाभिप्रायेण मनुः येन पतितेनैषां संसर्गं याति मानवः स तस्यैव व्रतं कुर्यात्।

सेवनं द्विजः तेनैतद्भुगुणयन्नित्यं त्रिभिर्वर्षैर्व्यपोहतीति अत्र हरपत्नी चण्डालो तथाच स्मृत्यन्तरे चण्डाली
पुक्कसी वेश्या रजस्वला याद्यकन्यका ऊढा दासमगोत्रा च हरपत्न्यः पंच कीर्तिताः अज्ञानतश्च चण्डाली
गमनाभ्यासे पतितप्रायश्चित्तं द्वादशवार्षिकं ज्ञानतोभ्यासे मरणान्तिकं कल्प्यं कल्पनायां मूलं मनुव
चनं चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छतीति अज्ञा
नतः पतति पतनं स्त्रीभवति अतस्तत्राभ्यासे द्वादशवार्षिकं ज्ञानात्साम्यं तज्जातीयत्वं प्राप्नोति अत
स्तत्राभ्यासे मरणान्तिकमेव युक्तं एतच्च मरणान्तिकं बहुकालाभ्यासविषयं अथ महापातकिसंसर्गि
प्रायश्चित्तं मनुः संवत्सरेण पतति पतितेन सहाचरन् याजनाध्यापनाद्यौनान्न तु यानाशनासना
त् अयमर्थः पतितेन सह यानाशनादि कुर्वन्संवत्सरेण पतितो भवति याजनाद्यैस्तु न संवत्सरे
णापि तु सद्य एव तथा च विष्णुः आसंवत्सरात्पतितेन सहाचरन् पतितः सह यानाशनाभ्यां यौन
स्रौवसंबंधात्सद्य एवेति यौनिः प्रयोजनं न तु युक्तेन पतितेन पतितया मैथुनयोग इत्यर्थः स्रौतसंबंधो
याजनं बृहद्विष्णुः संवत्सरेण पतति पतितेन सहाचरन् एकयानभोजनासनशयनैः यौवस्रौत

करात्राहृद्धिभुक्कामतोऽभ्यासे षड्वार्षिकम् अतिदिष्टे तु गमने गुरुतल्पदोषः तथा च व्याघ्रः जामिं कन्यां पारदार्यं
च कन्याहृषणमेव च साधारणस्त्रियो नास्ति गुरुतल्पत्वमेव चेति अथ प्रसंगाच्चण्डाल्यादिगमने विशे
षोऽभिधीयते ज्ञानतश्चण्डालादिषु सकृद्गमने संवत्सरं कृच्छ्रं चरेत् अज्ञानतो गमने चान्द्रायणद्वयं
तथा च यमः चण्डालपुक्कसानां तु भुक्त्वा गत्वा च योषितं कृच्छ्रार्धमाचरेज्ज्ञानादज्ञानादैन्दवद्वयमिति भ
गिन्यादिष्वप्येवं ज्ञेयं सयोनिषेधस्य जातुचेत्येकवाक्यत्वात् अत्रैव कामतः प्रवृत्तस्य रेतस्सेकान्त्याद्विः
हत्नावङ्गिरसोक्तं द्रष्टव्यम् पतितां त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च मासोपवासं कुर्वीत चान्द्रायण
मथवापि वेति रेतस्सेकादर्वाक् स्नुषादिगमनेऽप्येवमेव तथा च बृहद्यमः चाण्डालीं पुक्कसीं म्लेच्छीं स्व
सारं भगिनीं सखीं मातापित्रोः स्वसारं च निक्षिप्तां शरणागताम् मातुलानीं प्रव्रजितां सगोत्रां नृपयो
षितम् शिष्यभार्यां गुरोर्भार्यां गत्वा चान्द्रायणं चरेदिति चण्डाल्यादिषु कामतः प्रवृत्तस्य रेतस्सेकात्
वेति वृत्तस्य संवत्सरोक्तं भगिनीं मातुराप्तां तत्स्वसारं चान्यमातृजाम् एतास्तिस्त्रस्त्रियो मोहात्तप्तकृच्छ्रं स
माचरेदिति एकरात्रादिषु चण्डाल्यादिगमनाभ्यासे मनूक्तं त्रैवार्षिकम् यः करोत्येकरात्रेण वृषली

तिक्तैषांविद्यतेहिकथंचनेति विष्णुः पितृव्यभ्रातामहमातुलश्वशुरनृपपत्न्यभिगमनंगुरुदारगमनतुल्यं पितृमा
तृष्वसृगमनंचश्रोत्रियर्त्विगुपाध्यायमित्रपत्न्यभिगमनं स्वसुः सख्युः सगोत्रायाउत्तमवर्णायाश्चैतज्जायाकुमा
र्योरजस्वलायाः शरणागतायाः प्रव्रजितायानिक्षिप्तायाश्चेति अत्रयत्रविशेषप्रायश्चित्तमभिहितंतत्रतदे
९ व इतरयोर्गुरुतल्पप्रायश्चित्तार्धसाम्याभिधानात् गुरुतल्पसमेषुविष्णुनापितृमातृष्वसादिग्रहणमानुलो
म्येनहीनजातीयपितृष्वस्रादिविषयं एवमन्यत्राप्यूहनीयम् अथगुरुतल्पातिदेशः नारदः मातामातृष्व
साश्वश्रूर्मातुलानीपितृष्वसापितृव्यसखिशिष्यास्त्रीभगिनीतत्सखीस्नुषा दुहिताचार्यभार्याचसगोत्राश
रणागता राज्ञीप्रव्रजिताधात्रीसाध्वीवर्णोत्तमाचया आसामन्यतमांगच्छन्गुरुतल्पगउच्यते शिश्नस्यो
त्कर्तनात्तत्रनान्योदण्डोविधीयते याज्ञवल्क्यः पितुःस्वसारंमातुश्चमातुलानींस्नुषामपि मातुःस
पत्नींभगिनीमाचार्यतनयांतथा आचार्यपत्नींतनयांगच्छंस्तुगुरुतल्पगः लिंगंछित्वावधस्तत्रसका
मायास्त्रियाअपि अयमेववधोदण्डार्थंप्रायश्चित्तार्थंचगुरुतल्पसमेषुपरिगणितानांगुरुतल्पातिदेशे
षुपरिगणनंप्रायश्चित्तविकल्पार्थं तच्चजातिशक्त्याद्यपेक्षायायोग्यं योजनाचमिताक्षरायाम् समेष्वे

वित्तानेष्वपरस्युपपातकेषु पारदार्यप्रकरणोल्लिखितं तेन चैवं व्याख्यातं भवतीत्यर्थः वित्तानेष्वपरस्युपपा
तकेषु पारदार्य प्रकरणोल्लिखितेनेन चैवं व्याख्या तिवचनाद्राजवीथिषु परिव्राजनमेव दण्डरूपं प्रायश्चित्तं तत्रनिरपे
क्षं शुद्धिसाधनमिति दर्शयतीति वयं ब्रूमः महापातकस्थले कामतः प्रतिलोम्येन शूद्रादिषु प्रहन्तायाः स्त्रि
या महापथगमने महाप्रस्थानमनिच्छागमने उपपातकेषु तु राजवीथीषु परिव्राजनेनैव शुद्धिरिति अ
य गुरुतल्पसमानि मनुः रेतःसेकः स्वयोनीषु कुमारीष्वन्त्यजासु च सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं
विदुः रेतःसेक इति विशेषोपादानाद्रेतःसेकाभावे गुरुतल्पसमत्वाभावात्स्वल्पप्रायश्चित्तं याज्ञवल्क्यः
सखिभार्याकुमारीषु स्वयोनिष्वन्त्यजासु च सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं स्मृतं स्वयोनिर्भगिनी अन्त्य
जा श्वात्र चाण्डालाद्याः न तु रजकाद्याः तत्र स्वल्पप्रायश्चित्तत्वात् चण्डालादयस्तु मध्यमाङ्गिरसा दर्शि
ताः चण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः सगोत्राग्रहणेनैव
दत्तस्त्रीप्राप्तौ पुनरुपादानमधिकदोषख्यापनार्थं तथा च हारीतः मातृदुहितृस्नुषागमनमित्यतिपात
कानि अतिपातकिनस्त्वेते प्रविशेयुर्हुताशनं अतिपातकिनस्त्वेते प्रविशेयुर्हुताशनं महान्त्यानि कृ

मीपएक्वासः कार्य इत्यर्थः मनुः एतदेव व्रतं कार्यं योषित्सु पतितास्वपीति एतदेव द्वादशाब्दवार्षिकमेव अ
नुलोमगमनेतरज्ञानि ष्ठानि प्रतिलोमगमने कामाकामभेदेन संवर्तः शूद्रस्तु विप्रागमने गुरुतल्पविधिं चरे
त् अज्ञानाज्ज्ञानतो वापि ब्राह्मण्यातिक्रमितिस्थितिरिति वसिष्ठः शूद्रश्चेद्ब्राह्मणीमभिगच्छेत् वीरणैर्वेष्टयि
त्वा शूद्रमग्नौ प्रास्येत् ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां खरमारोप्य महापथमनुसं
व्राजयेत् पूता भवतीति विज्ञायते पैठीनसिरप्येवमेव प्राह पित्रैकशिरोवचनप्राप्तये शिरसीत्युक्तिः
यस्मात्सर्वाविशेषस्येत्यशीरम्लानडीरणाम तथा वैश्यश्चेद्ब्राह्मणीमभिगच्छेल्लोहितदर्भैर्वेष्टयित्वा वैश्य
मग्नौ प्रास्येत् ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां गौरं खरमारोप्य महापथमनुव्रा
जयेत् पूता भवतीति विज्ञायते राजन्यश्चेद्ब्राह्मणीमभिगच्छेत् शरपत्रैर्वेष्टयित्वा राजन्यमग्नौ प्रास्येद्ब्रा
ह्मण्याः शिरसि पावयनं कारयित्वा लग्नां श्वेतखरमधोप्य महापथमनुसंप्रोव्रजयेत् पूता भवतीति विज्ञा
यते एवं राजन्यायां वैश्यः शूद्रश्च राजन्यवैश्ययोरिति एतच्च वचनेस्मृतिमञ्जर्यामपरार्के च गुरुतल्पप्रक
रणे लिखितं तत्रापरार्के एवं व्याख्यातं महापथो राजमार्गः पूता भवति प्रायश्चित्तयोग्या भवतीत्यर्थः

त्स्यातिकृच्छ्रम् अत्रैवाभ्यासात्प्रवृत्तस्य तप्तकृच्छ्रः स्वेन प्रोत्साहितायां पराकः एतदेवाभिसंधाय जाबा
लिः अतिकृच्छ्रं तप्तकृच्छ्रं पराकं चतुर्थेव च गुरोश्शूद्रां सकृद्गत्वा बुद्ध्या विप्रः समाचरेदिति अत्रैवाकामप्रवृत्तस्य
तयाप्रोत्साहितस्य प्राजापत्यं उभयेच्छातस्मात्तपनम् स्वेन प्रोत्साहितायां सप्तरात्रोपवासः एतदभिप्रेत्या
ह्दीर्घतमाः प्राजापत्यं सांतपनं सप्तरात्रोपवासकं गुरोः शूद्रां सकृद्गत्वा चरेद्विप्रः समाहित इति ब्राह्मणी
पुत्रस्य तत्स्त्रियागमने वैश्यागमने च यत्प्रायश्चित्तं तदेव तत्स्त्रियापुत्रस्य वैश्यापुत्रस्य शूद्रागमन इति द्रष्टव्यं य
त्र शूद्रागमादिकया विशेषोभिहितस्तत्र स एव ग्राह्यः एवमन्यास्वपि स्मृतिवचोस्यनुबंधाद्यपेक्षया योज्या।
नि एवंविधपापेषु प्रवृत्तानां स्त्रीणामपि महापातकिनीत्वाविशेषः कामकृते मरणांतकं तथा च कात्या।
यनः एष दोषश्च शुद्धिश्च पतितानामुदाहृता स्त्रीणामपि प्रसक्तानामेष एव विधिः स्मृत इति याज्ञ।
वल्क्योपि छिन्नालिंगं वधस्तस्य सकामायास्त्रियास्तथेति अकामकृते तु द्वादशवार्षिकस्यार्धं स्त्रीणा
मर्धं स्य विहितत्वात् अयं तु विशेषः आरम्यादिः स्थितिर्नास्ति गृह एव वास इति तथा च योगयाज्ञवल्क्यः
पतितानामेष एव स्त्रीणां प्रकीर्तितो विधिः ग्रासोरहांतिके देयमन्नं वासश्च तद्गुणो रक्षणं मसेमनुवासः स

म॰प्रा॰
८२

कामतः प्रछन्नस्य ब्राह्मणी पुत्रस्यैरेतःसेकात्प्राङ्निवृत्तस्य मासत्रयं प्राजापत्याचरणं अत्रैवोभयेच्छातः प्रछन्नस्य मास
मतिकृच्छ्रचरणं अत्रैव स्वयमेव प्रोत्साहनेन कृता प्रछन्नस्य मासत्रयं कृच्छ्रातिकृच्छ्रानुष्ठानं अनेनैवाभिप्रायेण व्याघ्रः
कृच्छ्रं चैवातिकृच्छ्रं च तथा कृच्छ्रातिकृच्छ्रकं चरेन्मासत्रयं विप्रः तत्स्त्रियागमने गुरोरिति पूर्वोक्तविषय एव तया प्रो
त्साहितस्याकामतः प्रछन्नस्यैरेतस्सेकात्प्राङ्निवृत्तावतिकृच्छ्रः अत्रैवोभयेच्छातः प्रछन्नस्य तप्तकृच्छ्रः तत्रैव।
स्वेन प्रोत्साहितायां प्रछन्नस्य चांद्रायणं अनेनैवाभिप्रायेण काठः चान्द्रायणं तप्तकृच्छ्रमतिकृच्छ्रं तथैव च सकृद्ग
त्वा गुरोर्भार्यामज्ञानात्तत्स्त्रियां द्विजा इति वैश्यायां पितृपत्न्यां कामत उभयेच्छातः प्रछन्नस्यैरेतस्सेकात्प्राङ्निवृत्त।
स्य मासं तप्तकृच्छ्रः अत्रैव स्वेन प्रोत्साहितायां प्रछन्नस्य मासं पराकः अत्रैव तयैव प्रोत्साहितस्य मासं सांतप
नकृच्छ्रः अनेनैवाभिप्रायेण काश्यपः तप्तकृच्छ्रं पराकं च तथा सांतपनं गुरोः भार्यां वैश्यां सकृद्गत्वा तु द्विजः।
मासं चरेद्बुधः अत्रैवाकामतः प्रछन्नस्य तया प्रोत्साहितस्य पंचरात्रं उभयेच्छातः सप्तरात्रं स्वेन प्रोत्साहिता
यामष्टरात्रं एतत्सर्वमभिप्रेत्याह प्रजापतिः पंचरात्रं तथाश्नीयात्सप्ताष्टौ वा तथैव च वैश्यां भार्यां गुरोर्ग
त्वा सकृदज्ञानतो द्विज इति शूद्रायां पितृपत्न्यां कामतः प्रछन्नस्य तया प्रोत्साहितस्यैरेतस्सेकात्प्राङ्निवृत्त।

तागच्छेत्पुनः पुनः लिंगाग्रं छेदयित्वा ततः शुद्ध्येत किल्विषमिति शूद्रायां कामतोभ्यासे उपमन्यूक्तं द्वाद-
शवार्षिकम् पुनः शूद्रां गुरोर्गत्वा बुद्ध्या विप्रः समाहितः ब्रह्मचर्यमदुष्टात्मा सचरेद्द्वा[illegible] कालिष्टमेवाभुंजा-
नो ब्रह्मचारी सदाव्रती स्थानासनाभ्यां विहरं त्रिरह्नोभ्युपयन्नपः अधःशायी त्रिभिर्वर्षैस्तदपोहेत मातृक-
मिति अत्रैव भ्यासे ज्ञात्वा कर्पः गुरोः दात्रस्तां भार्यां पुनर्गत्वा त्वकामतः अ(?)माश्रामसमुद्धृत्य शुद्ध्येज्जीव-
न्नतोपि वेति वैशंपायनात्वकामतो गमने प्राजापत्यं चरेत्कृच्छ्रं समया गुरुतल्पग इति याज्ञवल्क्योक्तवर्षत्रयं
प्राजापत्याचरणं कल्प्यं हृद्ध मनुरपि अब्दत्रयमकामात्तु कृच्छ्रं नित्यं समाचरेदिति अत्रैव कामतोभ्यासे
हारीतोक्तं मरणांतिकं ब्रह्मचर्यं सम्यक्स्थविप्रो वैश्यायां गुरोरज्ञानमोहितः षडंगं ब्रह्मचर्यं च संचरेद्यावदा-
युषम् इति षडंगवाक्यान्युपस्थचक्षुः श्रोत्रमनांसि षडंगानि अमतिपूर्वं शूद्रायां पितृपत्न्यां गम-
नेमनूक्तं वात्स्ये मनुः वृक्षांगी चीरवासा वा श्मश्रुलो विजने वने प्राजापत्यं चरेत्कृच्छ्रमब्दमेकं समा-
हितः इति सुमंतः अथवा गुरुदाराभिगामी संवत्सरं काष्ठकिर्नीं शाखां वा पतिर्(?) अधःशायी त्रिषवणी भैक्षा-
हारः पूतो भवति अत्रैवाभ्यासे पूर्वमनूक्तं कृच्छ्रमब्दं द्विगुणं कुर्यात् तद्विधा पितृपत्न्यां सोपहितम्

दशा[illegible]कमिति व्रा[illegible]पु
स्नातुधिशुद्धि[illegible]पाय
पितृपत्न्यां गमनेयमे
[illegible]व्यासः

समंतु
[illegible]

प॰ पा॰
२८१

प्रहृतसमेतसेकामाच्छिद्रेन्नोषड्वार्षिकं कल्प्यमितिमितान्तरायां ब्राह्मणीपुत्रस्यमतिपूर्वंशूद्रजातीयगुरु
पत्नीगमनेप्राजापत्यकृच्छ्रान्वर्षत्रयमाचरेत् अमतिपूर्वंसर्वव्यभिचारिणीगुरुपत्नीगमनेपदक्रमरहिता
संहितामात्रजपसहितंचान्द्रायणत्रयं याज्ञवल्क्यः प्राजापत्यंचरेत्कृच्छ्रंसमावागुरुतल्पगः चान्द्रायणं
वात्रीन्मासानभ्यस्यन्वेदसंहितामिति पूर्वोक्तविषयद्वयेकामतः प्रवृत्तौयथाक्रमेणौशनसोक्तंव्र
गुरुतल्पाभिगामीसंवत्सरंब्रह्महत्याव्रतंषण्मासान्वातप्तकृच्छ्रंचरेदिति ब्राह्मणीपुत्रस्यकामतः क्षत्रि
जातीयपितृपत्नीगमनेनवचवार्षिकम् मातुःसपत्नींभगिनीमाचार्यतनयांतथा आचार्यपत्नींस्वसुतां
गच्छंस्तुगुरुतल्पग इतियाज्ञवल्क्येनगुरुतल्पातिदेशात् अत्रैवकामतोभ्यासे ...... मरणांतिकं पत्यागा
त्वापुनर्भार्यांगुरोः तत्रसक्तोद्विजः अत्रभार्यारहितलिंगमुत्कृत्यसम्यक्तः शुचिरिति ब्राह्मणीपुत्रस्यकाम
तोवैश्यायांपितृपत्न्यांगमनेषड्वार्षिकं तथाचपुलस्त्यः ब्रह्मपुत्रस्यक्षत्रियायांनववार्षिकंवैश्यायांष
ड्वार्षिकंक्षत्रियापुत्रस्यकामतोवैश्यायांमातरिनववार्षिकंशूद्रायांतुषड्वार्षिकंएवमेववैश्यापुत्रस्यापी
ति एवमेवनववार्षिकमित्यर्थः वैश्यायांकामतोभ्यासेलोगाद्युक्तंमरणांतिकंगुरोर्भार्यांतयोर्वैश्यायांग

यद्वैवमप्रतिहतस्तत्रैवाप्रलयात्तिष्ठेदिति पितृदारप्रोत्साहितस्य गुरुतल्पगमने मनुक्रयोरन्यतरद्दृष्ट
व्यं गुरुतल्पमभिभाष्यैनो नातप्ते स्वप्यादयोमये सूर्म्मीं ज्वलन्तीं चाश्लिष्य मृत्युना स विशुध्यति न प्राय:
शायने स्वाय एकं सूर्म्यालिंगनमपरं कामतो जननीगमने न वसिष्ठ: निष्कालको घृताक्तो गोमया
ग्निना पादप्रभृत्यात्मानमवदाहयेदिति अधिकदु:खोत्पादकं तत्कामकारविषयमेवोपयुज्यते अका
मतोऽभ्यासेप्येतदेव इदं च प्रायश्चित्तं मुख्यपुत्रस्यैव क्षेत्रजादीनां तु पुत्रकार्यकरत्वमेव न मुख्यपुत्रत्व
मत एव मनु: क्षेत्रजादीन्सुतानेतानेकादश यथोदितान् पुत्रप्रतिनिधीनाहु: क्रियालोपान्मनीषिण इ
ति एवं सापत्नमातृगमने यत्प्रायश्चित्तं तत्क्षेत्रजादीनामपि भवति अकामत: सवर्णामसवर्णां पितृ
पत्नीगमने शंखोक्तं द्वादशवार्षिकं अध:शायी जटाधारी पर्णमूलफलाशन: एककालं समश्नन्वै
वर्षेतु द्वादशे गते रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पग: व्रतेनैतेन शुध्यति महापातकिनस्त्विमऽ
ति अस्मिन्नेव विषयेऽकामत: प्रवृत्तस्य रेतस्सेकादर्वाङ्निवृत्तेः षड्वार्षिकं अकामतस्त्रैवार्षिकं जन
न्यांतु कामत: प्रवृत्तस्य रेतस्सेकादर्वाङ्निवृत्तेः षड्वार्षिकं अकामतस्त्रैवार्षिकं जनन्यांतु कामत:

रोरभिमुखस्तिष्ठेत् मृतो भवति किल्बिषात् नैरृतीं वा दिशं गच्छेदानिपातादजिह्मगः प्राणत्यागाद्विशुध्ये

देमनुस्तायंभुवोऽब्रवीत् सूर्मी कार्ष्णायसी लोहप्रतिकृतिः गुरोरभिमुखस्थितावपि प्राणत्यागेनैव शु

द्धिः अत्र गुरुर्निषेककृत्पिता अत्र द्विजग्रहणमुपलक्षणं सवर्णागमने चयोनौ रेतःसेके सत्येव अत

स्तनोवाद्भिःहन्तीन महापातकत्वे एतच्च जननीमकामतः तत्पत्नीं सवर्णामसवर्णां वा गच्छतः का

मेन तथा च षट्त्रिंशन्मते पितृभार्यामविज्ञाय सवर्णां योधिगच्छति जननीं चाप्यविज्ञाय नाम्न्तःप्र

द्विगाम्नुयात् जनन्यां कामकारेतु वक्ष्यते अथः शय्यायां शयनेस्वकर्मैवि व्याप्यकुर्यात् तथा च मनुः

गुरुतल्पभिभाष्यैनं तल्पे सप्यादयोमयइति ...रो विशेषो वसिष्ठेनोक्तः निष्कालको घृतनाभ्यक्त

स्तप्तां सूर्मी परिष्वजेदिति उभयेच्छातः प्रवृत्तौ तत्प्रायः शयनस्वापप्रायश्चित्तं स्वप्रोत्साहनप्रवृत्तौ

तु अथवा शिश्नहषणविस्यादिप्रायश्चित्तं अत्र विशेषमाह मनुः स्वयं वा शिश्नवृषणावुत्कृ

त्यादाय चाञ्जलौ वितिष्ठेत्नैःनीत्तमाणेनैव गमनं कार्यं शंखलिखितौ स्व...णशिश्नवृषण

उत्कृत्यानीतमाणे व्रजेदिति वसिष्ठः सहषणं शिश्नमुत्कृत्याञ्जलावाधायदक्षिणाभिमुखेग

त्रयीकाले भुंजानस्त्रिभिर्वर्षैर्व्यपोहति ब्राह्मणस्य गुणाढ्यस्य हत्वा विप्रस्तु निर्गुणः प्रभूतं सान्वयं धं
ध्वसंयुक्तमिन्धकेंटाग्निना गुणवान्ब्राह्मणो हत्वा दत्त्रियस्यागुणस्य च चरेत्सांतपनं कृच्छ्रं तन्निर्यात्मविशुद्धये
एवमन्यान्यपि विभो प्रायश्चित्तानि भागशः सुवर्णस्तेयविषये स्थापनीयानि पण्डितैरिति चतुर्विंशतिमते
त्र्यंशं हत्वा द्विजो लोभाच्चरेच्चान्द्रायणव्रतं गद्यानकदशादूर्ध्वं माषान्ताद्द्विगुणं चरेत् आसहस्रान्त्रिगुणमू
र्ध्वं होमविधिः स्मृतः सर्वेषां धातुलोहानां पराकं तु समाचरेत् धान्यानां हरणे कृच्छ्रं तिलानामेन्द्वं स्मृतं र
त्नानां हरणे विप्रश्चरेच्चान्द्रायणव्रतमिति किंचिदधिकं शास्त्रीयमासत्रयेगद्यानकशब्दं प्रयुंजते केचन
टंकापरिमिते प्रयुंजते रत्नहरणे चान्द्रायणं स्वल्पमूल्यविषयं तच्चादिरत्नापहारविषयं वा उत्तमरत्न
हरणस्य स्वल्पस्तेयसमत्वात् अथ स्वर्णस्तेयसमानि याज्ञवल्क्यः अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं त
था निक्षेपस्य च सर्वस्य स्वर्णस्तेयसमं मतं अश्वादीनि ब्राह्मणसंबन्धीनि निक्षेपः सुवर्णव्यतिरिक्त
स्य अथ गुरुतल्पप्रायश्चित्ते यमः गुरुदाराभिगमनं कृत्वा मोहेन वै द्विजः ज्वलन्तीमायसीं शय्यामासेवि शी
र्षं गुरुतल्पगः शूर्मीं ज्वलन्तीमाश्लिष्यमृत्युना स विशुध्यति अथवा शिश्नवृषणावुत्कृत्य प्रतिगृह्य च गु

म॰ या॰
२७८

श्चित्तमिदंकुर्यात्ऋदतोमेतन्निबोधय लोमहीने त्वताकुश्चआत्मानंपावकेक्षिपेत् हत्वातुकांचनंवीरःक्षत्रि
योब्राह्मणस्यतु सोनुबंधोह्यनाथस्यडेरोदरपरोगुह आत्मानंसदहेद्दीरशस्त्रेणाडम्बरेणात ततःशु
द्धिमवाप्नोतिदिष्टांतेप्राणवर्जितः हत्वातुकांचनंवैश्योगुणिनोब्राह्मणस्यच असतोगुणहीनस्यस्वामिनंतुवै
धस्वराधिप तद्व्यपयजतिप्राणांस्ततःशुद्धिमवाप्नुयात् चरेत्स्नानयनंकृच्छ्रंतन्निर्यात्यात्मशुद्धये निर्यात
स्वामिनेदत्वाआत्मशुद्धयेमरणांतिकप्रायश्चित्तकरणयोग्यताये अमुमेवार्थमाह तन्निर्यात्येतिवाक्य
त्रयंवदंतिमनीषिणः तत्पूर्वंचैवयोग्यस्यसूचकंनात्रसंशयः निर्यात्येतिवाक्यमितिचरेत्स्नानपनमिति।
पूर्ववाक्यं तन्मरणांतिकप्रायश्चित्तात्पूर्वं योग्यस्येतिभावपरोयंनिर्देशः योग्यत्वसूचकमित्यर्थः अपह
तद्रव्यंदत्वासंतापनचरणानंतरंमरणांतिकप्रायश्चित्तंकुर्यादित्यर्थः क्षत्रियस्यतुबालस्यब्राह्मणोहरः।
तोयदि पंचनिष्कप्रमाणंतुसुवर्णिकेतनंप्रति कृत्वाजिनीजटीदण्डीमिताशीविजनेवने जपमानो।
केसर्जंचचरेत्ब्रह्महतोव्रतम् क्षत्रियस्यगुणाढ्यस्यहत्वाविप्रस्तुनिर्गुणः चतुर्थकालेभुंजानःत्रिभिर्वर्षैः।
विशुद्ध्यति क्षत्रियादयोपिगुणिनंवैशुद्धयेनात्रसंशयः विप्रस्यगुणवान्विप्रोनिर्गुणस्यापहृत्यतु च

रणाङ्कमन्वेनतुष्टिकरंधनंदद्यात् यत्तुव्यासवचने एतदेवव्रतंस्तेनःपादहीनंसमाचरेत् क्षितिनव
वार्षिकंतत्त्रिगुणस्वामिकसुवर्णापहारे यच्चाङ्गिरणोक्तं षडब्दंवाचरेत्कृच्छ्रंयजेद्वाक्रतुनाद्विजः तीर्था
निवाभ्रमन्विद्वांस्ततःस्तेयाद्विमुच्यतइति तन्निर्गुणस्वामिकस्यनामकुटुम्बभर्त्तणार्थ्यापहारे कृतः
स्वर्जिदादिः इत्येवमादीन्यन्यान्यपिप्रायश्चित्तानिविषयविशेषशङ्काद्यपेक्षयायोज्यानि तथाचभ
विष्यत्पुराणे महापातकनिर्देशेनतृतीयस्तेयमुच्यते ब्राह्मणद्रव्यविशेषात्प्रयोगतनविशेषः अनुबंध
विशेषाच्चप्रायश्चित्तंविधीयते हत्वातुकांचनंविप्रोगुणिनोब्राह्मणस्यतु स्वयंचनिर्गुणोवीरंच
रेद्ब्रह्महणेव्रतं यदाचनिर्गुणःस्वामीक्षत्रियोवैश्यएववा हर्ताचब्राह्मणोवीरतदापस्तम्बभाषितं
क्षत्रियस्वस्य अष्टगुणहीनस्यकृच्छ्रस्तपाः हत्वातुकांचनंविप्रप्रायश्चित्तमिदंचरेत् चतुर्थकालेभुं
जानस्त्रिकालंस्नानमाचरेत् चतुर्थकालेभुञ्जानस्त्रिकालंस्नानमाचरेत् स्थानासनाभ्यांविहरंस्त्रि
भिर्वर्षैर्विमुच्यते क्षत्रादीनांगुणवतांमहेणपहृतेगुरुः क्षत्रादीनागुण अल्पानुबंधेचतथाएतदे
वभवेद्विभो अष्टविप्रसुवर्णंतुप्रभूतमपहृत्यच सविशेषानुबन्धंचब्राह्मणोघृतवल्लभःप्राय।

म॰ पा॰
२७८

नैष्ठिकादशगुणादानसमर्थस्याचान्तर्गणमाचरणामनेनन्यायेन प्राप्तं तत्र जातिशक्त्याद्यपेक्षया द्वैगुण्यादिकं कल्प्यं
यो राजा मनुष्ठ[illegible]र्दनाहतस्समर्थः शारीरशक्त्याद्यभावात्तदा वसिष्ठोक्तं ज्ञेयं स्तेनः प्रकीर्णकेशो राजानमि-
त्यादि ततस्तस्मै राजौदुम्बरं शस्त्रं दद्यात् तेनात्मानं प्रमापयेन्मप्रकीर्णकेशो राजानमित्यादि ततस्तस्मै राजौ
रणात्पूतो भवतीति विज्ञायते तेनात्मानं प्रमापयेन्मरणात्पूतो भवतीति विज्ञायते औदुम्बरं ताम्रमयं तत्रिया
द्यैर्ब्रह्मणसुवर्णहरणे ब्राह्मणाद्यैर्गुरुश्रोत्रिययागस्थविप्रसुवर्णहरणे च वसिष्ठोक्तं मरणान्तिकं प्रायश्चि-
त्तं निष्कालको घृताक्तो गोमयाग्निना पादप्रभृत्यात्मानं प्रमापयेन्मरणात्पूतो भवतीति विज्ञायत इति नि-
ष्कालकशब्दः पूर्वमेव व्याख्यातः यत्तु राजतादिद्रव्यान्तरबुद्ध्या वस्त्रान्तरबद्धं नाम सुवर्णमपहरतीति तदा-
ज्ञानापहृतमुच्यते तत्र प्रायश्चित्तं याज्ञवल्क्येन अनिवेद्य नृपे शुद्ध्येत् सुरापव्रतमाचरन् आत्मतुल्यसुव-
र्णं वा दद्याद्वा विप्रतुष्टिकृत् राजनि प्रकथयन्नेव द्वादशवार्षिकं व्रतं संपूर्णमाचरेत् आत्मतुल्यसुवर्ण-
[illegible] दानादि गुरुतरप्रायश्चित्तसमभ्यासात् सुरापव्रतमित्यनेन शवशिरोध्वजतत्कपालधारणानिरासः
यद्यपहृतात्पतधनं वा [illegible]दात्मतुल्यसुवर्णदानं आत्मतुल्यसुवर्णाभावे विप्रस्य यावज्जीवकुटुम्बभ-

२७८

णां जैह्म्यमुक्तं षेचवर्जितं रजस्वलामुखास्वादः सुरापानसमानि षट् जैह्म्यं कौटिल्यं भुवगुरुविषयं देवलः स्व
णां द्वितीयायां यो भार्यां दहेद्वैतानाग्निकाग्निभिः जीवन्त्यां प्रथमायां तु सुरापानसमाहितदिति समत्वकथनं तत्प्रायश्चि
त्तातिदेशार्थं अतस्तदर्धं प्रायश्चित्तं भवति व्रतातिदेशानुपादनं भवतीति प्राङ्निरूपितं अथ सुवर्णस्तेयप्राया
श्चित्तं याज्ञवल्क्यः ब्राह्मणः स्वर्णहारी तु राज्ञे तु मुसलं पर्यतु स्वकर्माख्यापयंस्तेन मुक्तोपि वा शुचिः राजा
भिषेकाद्द्विगुणं वा सत्रियः तेन मुसलेन हतो मरणान्मुक्तो वा शुद्ध एव अहनने राज्ञो दोषः स एव अतएव मनुः अतऊ
र्ध्वं प्रवक्ष्यामि सुवर्णस्तेयनिष्कृतिम् सुवर्णस्तेयकृद्विप्रो राजानमभिगम्य तु स्वकर्म ख्यापयन्ब्रूयान्मां भवाननु
शास्त्विति गृहीत्वा मुसलं राजा सकृद्धन्यात्तु तं स्वयम् वधेन शुद्ध्यति स्तेनो ब्राह्मणस्तपसैव वा राजा स्तेनेन गन्तव्यो
मुक्तकेशेन धावता आचक्षाणेन तत्स्तेयमेवं कर्मास्मि शाधि मां स्कन्धेनादाय मुसलं लगुडं वापि खादिरं अक्षिंवो
भयतस्तीक्ष्णामायमेवं कर्मास्मि शाधि मां स्कन्धेनादाय मुसलं लगुडं वापि खादिरं संदण्डमेव वा शासनाद्वा विमोक्षा
द्वा स्तेनः स्तेयाद्विमुच्यते अशासिनाद्वा विमोक्षाद्वा स्तेनः स्तेयाद्विमुच्यते अशासिनाद्वा विमोक्षाद्वा स्तेनः स्तेया
द्विमुच्यते अशासित्वा तु तं राजा स्तेनस्याप्नोति किल्बिषमिति शाधि जहि अत्रिः स्त्री काष्ठकुद्दालः शक्तिं वो भय

णानुपूर्व्येणोत्पन्ने तत्क्रमेणाद्याद्विजातिभार्याः शूद्रापर्यन्तास्ताभिः सुरा न पातव्या यदि पिबेयुस्तदार्धप्रायश्चित्तं तथा
च मनुः पतत्यर्धं शरीरस्य यस्य भार्या सुरां पिबेत् ब्राह्मणभार्यायाः शूद्रया अपि मद्यमात्रेण पातव्यं ब्राह्मणा
स्य निषिद्धत्वात् यदि विवक्षितमतदापातित्यं नास्ति निषेधस्य शूद्रसवर्णाविषयत्वाभावात् तत्संसर्गात्पत्युर्ब्राह्म
णस्यापि न पातित्यदोषः किं त्वेनसो भवति गर्भे च दोषो जायते प्रथमतः शूद्रा वेदनसर्वसमाने तत्रापि पीतमद्य
या सह संसर्ग इति स्वल्पो दोषोस्त्येव अत एवोपमातकमध्ये मद्यपस्त्रीनिषेवणमिति परिगणितम् एतत्सर्व
मभिप्रेत्याह शंखः सुरालशुनपलाण्डुगृंजनकमांसादीन्यभक्ष्याणि वर्जयेत् आहारमयशरीरं तन्मयत्वाद्ब्राह्मणाः सं
कीर्यन्ते मातृस्तनपीतादिभिर्गर्भः सम्भवतीति अथ सुरापानसमानि तत्र मनुः ब्रह्मोज्झता वेदनिन्दा कौट
साक्ष्यं सुहृद्वधः गर्हितान्नाद्ययोर्जग्धिः सुरापानसमानि षट् गर्हितं पलाण्ड्वादि अनाद्यममेध्यादीनीति स्मृ
तिमंजरी कल्पतरौ तु गर्हितं शास्त्रप्रतिषिद्धमपि लोकानिन्दितं अनाद्यं लशुनादि मतिपूर्वमनयोर्भक्षणे सुरा
पानसाम्यं अत एव मनुः छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटं पलाण्डुं गृंजनं चैव मत्या जग्ध्वा पतेन्नरः अम
तिपूर्वकत्वे न प्रायश्चित्तं तरं तेनैवोक्तं अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सान्तपनं चरेदिति याज्ञवल्क्यः निषिद्धभक्ष

धेनाज्ञानतो ब्राह्मणेन पीते तथा ब्रह्मतत्त्वविशाम ज्ञानतः रेतोविण्मूत्रपाने याज्ञवल्क्यः अज्ञानात्सुरां पीत्वा रेतोविण्मूत्रमे
व वा पुनः संस्कारमर्हति त्रयो वर्णा द्विजातयः अत्र सुरापेक्षादित्रयव्यतिरिक्तमद्ये प्रायश्चित्तस्याल्पत्वात् पुनरुपनयने
तप्तकृच्छ्रपूर्वकम् तथा च गोतमो मद्यपाने प्रयुंक्ते अमत्या मद्यपाने पयो घृतमुदकं वायुं प्रति त्र्यहं तप्तानि पिबेत्स कृ
च्छ्रः ततोस्य संस्कारः मूत्रपुरीषकुणपरेतसां प्राशने चेति ज्ञानं तु वसिष्ठोक्तं द्रष्टव्यं मत्या मद्यपाने पयो घृत
मुदकं वायुं प्रति त्र्यहं तप्तानि पिबेत्स कृच्छ्रः ततोस्य संस्कारः मूत्रपुरीषकुणपरेतसां प्राशने चेति ज्ञानं तु वसिष्ठोक्तं
द्रष्टव्यं मत्या मद्यपाने त्वसुरायाः सुरायाश्चाज्ञानेन कृच्छ्रातिकृच्छ्रौ घृतप्राशः पुनः संस्कारश्चेति सुरायाश्चा
ज्ञानत इति एतच्च द्रव्यांतरसंसृष्टायाः सुराया बलात्पाने तत्राप्यघ्रातस्य वेदितव्यं यच्चापस्तंबेनोक्तम् अ
भक्ष्याणामपेयानामलेह्यानां च भक्षणे रेतोमूत्रपुरीषाणां प्रायश्चित्तं कथं भवेत् पद्मोडुम्बरबिल्वानां प
लाशस्य कुशस्य च एतेषामुदकं पीत्वा त्रिरात्रेण विशुध्यतीति इति तदज्ञानाज्ञालामद्यस्य महत्वाने वे
दितव्यम् एवमन्येष्वपि उच्चावचप्रायश्चित्तानि जातिशक्तिवयोनुबंधज्ञानाज्ञानसकृदघाभ्यासाल्पताभ्या
सबलाबलाकारापेक्षया योज्यानि एतस्मिन्प्रकरणे गुरूणि लघूनि लघूनीति गोतमस्मरणात् निस्तावा

म·पा·
२७५

क्करसमेवान्नंभक्तयोतितत्साम नूक्तं पुनरुपनयनं अज्ञानात्प्राचिविंमूत्रंसुरासंस्पृष्टमेवच पुनःसंस्कारमर्हंतित्रयोवर्णाद्वि
जाइयज्ञुति पुनरुपनयने मेखला आश्वलायनेनोक्तः अथोपवीतस्तर्वस्पक्वनाकृतंकेशवपनं मेधाजननंचानिरुक्तंपरिदा
नंकालश्च तत्सवितुर्वृणीमहइतिसावित्रीमित्यादि शुष्कसुराभाण्डोदकपाने शातातपः सुराभाण्डोदकपानेछर्दने
घृतप्राशनमहोरात्रोपवासश्चेति सक्तसुराभांडोदकपाने सात्तात्सुरावयवानां विद्यमानत्वात्पादोनंसुरापानप्रायश्चि
त्तंकल्प्यं तत्राप्यवयवाधिक्येसंपूर्णमेव शुष्कसुराभाण्डस्थस्यपर्युषितोदकपाने बौधायनः सुरापानस्ययोभाण्डे
ष्वपःपर्युषिताःपिबेत् शंखपुष्पीविपक्वंतुत्क्षीरंसप्तपिबेअहमितिपूर्वोक्तविषये कामतोभ्यासेसएव अपामुरा
भाजस्थामद्यभाण्डस्थितास्तथा पंचरात्रंपिबेत्पीत्वाशंखपुष्पीशृतंपयइति मतिपूर्वकंशुष्कमद्यभाण्डस्थितो
दकस्यसकृत्पाने विष्णुः अपःसुराभाजस्थाःपीत्वासप्तरात्रंशंखपुष्पीशृतंपयःपिबेदिति अत्रैवाभ्यासेहृद्ध
यमः सुराभाण्डस्थितंतोयंयदिकश्चित्पिबेद्द्विजः सहान्द्रशाह्रंतीरंणपिबेद्ब्राह्मीसुवर्चलामिति सोमयाजिनः
सुरायमद्यगंधघ्राणे मनुब्राह्मणस्तुसुरापस्यगंधमाघ्रायसोमपः प्राणानप्सुत्रिरायम्यघृतंप्राश्यविशुद्ध्यति ए
तच्चाकामकारे कामकारेद्विगुणम् असोमयाजिनस्तुजातिभ्रंशकरोक्तप्रायश्चित्तंपैष्टीगौडीमाध्वीव्यतिरिक्तम

जष्टर्वकपानेद्विगुणो, समाभ्यासेवसिष्ठोक्तं, अभ्यासेतत्सुरायाः अग्निवर्णांसुरांपिवेत् मरणात्पूतोभवति अत्रसु
राशब्दोगौडीमाध्वीपरः साक्षात्सुरायाः सकृत्पानेपिमरणांतिकस्योक्तत्वात् तथाचभविष्यत्पुराणे गौडीमाध्व्योस्तु
याभ्यासेप्राणांतिकमुदाहृतमिति केचित्तुयाज्ञवल्क्यवचनमन्यथापठंति मद्ययेत्तुसमानिशिा इत्येकवचनां
तत्वेनतन्मानवेनसमानार्थं कणान्वाभक्षयेदब्दंपिण्याकंवापिवैनिशि सुरापानापनुत्यर्थंवालवासाजटीध्व
जीति एतच्चाबुद्धिपूर्वंसुरायास्तालमात्रसंयोगेद्रष्टव्यं प्रायश्चित्तस्याल्पत्वाद्दोषोप्यल्पएवकल्पनीयः अतए
वपानशब्दोप्यत्रपानाविनाभूतत्वादिसंयोगद्रष्टव्यं प्रायश्चित्तस्याल्पत्वाद्दोषोकल्पएवकल्पनीयः अतएवा।
पानशब्दोप्यत्रपानाविनाभूतत्वादिसंयोगेद्रष्टव्यं प्रायश्चित्तस्याल्पत्वाद्दोषोप्यल्पएवकल्पनीयः अत्रापिबाल
वृद्धादीनांपूर्ववदेवार्धंपादश्चकल्पनीयः उपनीतानांबालानामर्धं अनुपनीतानांपादः एवंविवाहिताविवा
हितभेदेनस्त्रियाश्चपि उपनयनस्थानत्वाद्विवाहस्य वौधायनः त्रैमासिममत्यासुरायानेकृच्छ्राद्धपादंचरि
त्वापुनरुपनयनमिति एतच्चनंममसाध्यव्याध्युपशमार्थंयानेवेदितव्यम् अत्रैवविषयेबार्हस्पत्यमपि गौडी।
माध्वीसुरांपीत्वाविप्रःसमाचरेत् तप्तकृच्छ्रपराकंचचांद्रायणमनुक्रमात् इति यद्दासमद्यसंस्पृष्ट

वधजीत्यभिहितं तत्पानपात्रेणाधजीतिविज्ञेयं जटीवेतिवाशब्दः पिण्याकादिभक्षणा ह्यप्रायश्चित्तेनविक
ल्पार्थः सचविकल्पोव्यवस्थितएवव्यवस्थाविषयविभागादेवमस्पति गोवालकस्थिताः केशावालाः छागा
दिलोमानिवा तन्निर्मितवस्त्रप्रावृतस्यातिदेशिकत्वेपिसम्पूर्णमेवप्रायश्चित्तंभवति तथाचवृद्धहारी
तः द्वादशभिर्वर्षैर्भक्ष्यमाणकिनःशूयंतेइति अथवापिण्याकंतिलकल्ककणान् तंडुलकणान्वा आ
हारांतरपरित्यागेनसकृत्प्राणयात्रामात्रमेव समाचरेयत्रयंरात्रौभक्षयेत् द्वादशवार्षिकाचरणपिण्या
कादिभक्षणंजलबुद्धासकृत्सुरांपीत्वाछन्देनकृतेवदितव्यम् यदाहव्यासः एतदेतद्व्रतंकुर्यान्मद्यपश्छ
न्देनकृते पंचगव्यंचतस्योक्तंप्रत्यहंकायशोधनमिति एतदेवब्रह्महत्याव्रतमेवपिण्याकभक्षणेनसं
व्यवहार्यत्वमेव नपारलौकिकनरकोपभोगनिवृत्तिरितिकल्पनीयमल्पप्रायश्चित्तत्वात् अथवाद्वाद
शवार्षिकाशक्तप्रत्युपदेशः सतलोके द्वयेशुद्धएव अथवाज्ञानतः पैष्टीपीत्वाऽज्ञानितस्यब्राह्मणस्या
द्वादशवार्षिकं तस्यैववर्षएववंदेवगोडीमाध्वीविषयेपिण्याकादिभक्षणंचेतिकल्पनीयं गौडीमाध्वीतो

प्रस्यानमातिष्ठन्मुच्यतेसर्वकिल्बिषादिति एतच्चमरणांतिकप्रायश्चित्तंपर्षदावादेष्टव्यं अपिस्तुतत्भुत्पन्नश्चेत्

स्वयमेवतात्माकुर्यात् अबुत्पन्नश्चेत्प्रायश्चित्तस्वरूपंशिष्टेभ्योज्ञात्वातदनुज्ञामंतरेणस्वयमेवकुर्यात् तथाच

मनुः मतिपूर्वंमनिर्देश्यंप्राणांतिकमितिस्थितिरिति एवंप्राणांतिकेषुसर्वत्रज्ञेयं बालादिषुपादःपादो

बालेषुदातव्यइत्यादियोज्यं यत्तुकुमारवचनं मद्यमूत्रपुरीषाणांभक्षणेनास्तिकश्चन दोषस्तथायंचमाह

वीहृद्धंपित्रोस्तुहस्तरोरिति तत्स्वल्पदोषप्रदर्शनार्थंज्यात्यायेणनिषेधस्यप्राग्दर्शितत्वात् अतएवजात्

वापिः उपनीतस्तुयोबालोमद्यंहोमात्पिवेद्यदितस्यकृच्छ्रत्रयंकुर्यान्मातानाभ्रातातथापितेतिसुरापानेतुष

ट् कृच्छ्राःकल्प्याः सहोमेतमवचनम् प्रागुपनयनात्कामचारपादभक्षाइतितस्मादिव्यतिरिक्तपर्यु

षितादिविषयम् अकामतःसुरापानेप्रायश्चित्तमाह याज्ञवल्क्यः बालवासाजटीवापिब्रह्महत्याव्रतं

चरेत् पिण्याकंवाकणान्वापिब्रह्महत्याव्रतंचरेत् पिण्याकंवाकणान्वापिभक्षयेत्तुसमानिशि बालवासाग्र

हणमितितरपक्षीपलक्षणार्थम् अत्रचशावशिरोध्वजतत्कारालधारणानिहन्तिः मनुना यस्तुरायव्रतप

म॰प्रा॰
१७३

काथेनापादिजाग्निवर्णां याज्ञवल्क्यः सुरांतघृतगोमूत्रपयसामग्निसन्निभं सुरापोन्यतमं पीत्वा मरणाच्छुद्धिमृच्छ
ति गोमूत्रमपि नवलीवन्दस्य अपितु स्त्रीव्यक्तेरेव घृतशोन्यतमं पीत्वा मरणाच्छुद्धिमृच्छति गोमूत्रमपिनवलीवं
पयः साहचर्यात् एतच्च सकृत्कामकारे तथा चांगिराः सुरापानं सकृत्कृत्वा चाग्निवर्णां सुरां पिबेदिति बृहस्प
ति सुरापानेकामकृते ज्वलंतीं तां विनिःक्षिपेत् मुखेन या विनिर्दग्धो मृतः शुद्धिमवाप्नुयात् गोमूत्रमग्निवर्णं
वा पिबेत् सलिलमेव वा कुर्याद्वानशनेनतावद्यावत्प्राणैर्विमुच्यते इति यत्र मरणांतिकप्रायश्चित्तानंतरं शावशरी
रं विद्यते तत्र मरणादेव पापस्यापगतत्वात् दाहादिसंस्कारः सद्य एव भवति तथा च भविष्यत्पुराणम् आयसेन भा
जनेन तु ब्राह्मणो वारुणीं पिबेत् अग्निवर्णां पापहरां ततः पापात्प्रमुच्यते जीवितस्यांतकाले तु श्मशाने वि
हितो विधिरिति कर्त्तव्य इति शेषः श्मशाने विहितो विधिर्दाहादिः शरीराभावे त्वस्थिषु पालाशविधिना
वा संस्कारः कर्त्तव्यः अत्र विशेषमाह पैठीनसिः सुरापः आर्द्रवासा अग्निवर्णां सुरां पिबेदिति प्रचेताः सु
रापोग्निवर्णामायसेन पात्रेण ताम्रेण वा पिबेदिति अङ्गिराः भृगुप्रयाते पतनं ज्वलंतं वा समाविशेत् महा

॥

१७३

रंतालं खार्जूरं पानसम् मध्वूल्यं चैव माध्वीकं मैरेयं नारिकेलजम् अमेध्यानि दशैतानि मद्यानि ब्राह्मणस्य तु इ
ति पुलस्त्यः पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवम् मध्वूल्यं चैव माध्वीकं मैरेयं नारिकेलजं समानि च वि
जानीयान्मद्यान्येकादशैव तु द्वादशं तु सुरामद्यं सर्वेषामधमं स्मृतमिति मनुः यक्षरक्षःपिशाचान्नं मद्यं
मांसं सुरासवम् तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविरिति राजन्यवैश्ययोः सुरा निषिद्धा न गौड्यादिम
द्यनिषेधः तत्रापि ब्रह्मचारिणः सर्वनिषेधः समान्येन ब्रह्मचारिणो मध्वादिनिषेधात् व्यासः उभौ मध्वाम
वाटीवोढश्शिंद्रमिकेश वार्जनाविति वृहद्याज्ञवल्क्यः कामादपि हि राजन्यो वैश्यो वापि कथंचन मद्यमेवासुरां
पीत्वा न दोषं प्रतिपद्यते इति सुरा तु त्यतिप्रभृति द्विजातिमात्रस्य निषिद्धा तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सु
रां पिबेदिति स्मरणात् तथा सुरापाननिषिद्धस्त्र जातापाश्रय इति स्थितिरिति शूद्रस्य न सुरानिषेधो नामापि
मद्यनिषेधः इति स्वरूपनिरूपणं अथ प्रायश्चित्तम् तत्र मनुः सुरां पीत्वा द्विजो हा मादग्निवर्णां सुरां पिबेत् त
यास्य काये निर्दग्धे मुच्यते किल्बिषात्ततः मोहात् शास्त्रार्थापरिज्ञानात् न तु स्वरूपापरिज्ञानात् अग्निवर्णां

तातिदेशस्याधिकत्वात्तत्पादोनं साम्यद्वारातिदेशप्राप्तेर्व्यवहितत्वात् तदर्धं प्रायश्चित्तमिति युक्तं अनेनैवाभि
प्रायेणास्मृतिमंजर्यामभिहितं समानां चातिदेशिकेभ्योपि न्यूनत्वमिति अत एव मिताक्षरायां यानि सुव
र्णस्तेयसमत्वेन प्रतिपादितानि तेषु पादोनमेव कार्यमिति अपरार्केपि सुवर्णस्तेयप्रकरणे तत्सामान्य
धप्रायश्चित्तानीति येषां चं कौटसाक्ष्यादीनां ब्रह्महत्यासाम्यं सुरापानसाम्यं चाभिहितं तत्राधिकपक्षाश्रय
णे तेषां पादोनमेव कल्प्यं अथवा शक्तिमतः पादोनं शक्तिरहितस्यार्धमिति कल्पनीयमिति स्मृतिकारवर्णितो
यः अत्र न्यायेन त्वतिदेशे संपूर्णमेव प्राप्नोतीत्यतिदेशस्याव्यवहितत्वात् अथ सुरापानप्रायश्चित्तं सुरा पैष्टी
व तदाह मनुः सुरा वै मलमन्नानां पाप्मा च मलमुच्यते तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबे
दिति यत्तु तेनैवोक्तं गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा यथैवैका तथा सर्वा न पातव्या
द्विजोत्तमैः तद्द्विजोत्तमानां ब्राह्मणानां गौडीमाध्व्योरपि पैष्टीसमत्वप्रतिपादनार्थं अत्र द्विजोत्त
मग्रहणाद्ब्राह्मणस्य सुरादिसकलमद्यनिषेध उत्पत्तिप्रभृत्यपि अत एव बृहद्विष्णुः माधूकमैक्षवं से

यामहापातकप्रायश्चित्तातिदेशस्थलेऽनिर्दिष्टस्यापि महत्त्वात् साक्षाद्ब्रह्महननस्येवातिदिष्टस्थले

यागस्थत्रात्रेयीहननेऽपि ब्रह्महत्यासाम्यादेकमेव कल्प्यं यत्तु कर्मविपाके ब्रह्महत्याप्रायश्चित्तातिदेशान्नद

र्धमिति कल्पयेदिति तत्रापि प्रायश्चित्तेन स्वल्पावशिष्टत्वात् तस्मान्महापातकसमेष्वपि दिष्टेषु चपा।

दोनं प्रायश्चित्तं कल्पनीयं अनेनैवाभिप्रायेणामिताक्षरायां अत एवोपदेशिकेभ्यो न्यूनत्वादातिदानि।

देशिकानां पादोनान्येव ब्रह्महत्याव्रतानि द्वादशवार्षिकादीनि भवंतीति अपरार्केऽपि नवधं कृतवतो

कृतवंशस्यैकमेव व्रतं युक्तं तेन न्यूनः पादोनं कल्प्यमिति चरेद्व्रतमहत्वापि घातार्थं चेत्समाहित इत्येतद्

वचनव्याख्यानसमये भिहितं महापातकप्रकरणे स्मृतिमंजर्यामपि आतिदेशिकेषु चातिदेशविधाना

देवोपदेशिकेभ्यः किंचिन्न्यूनता विज्ञेयेति एतच्च समेष्वतिदिष्टेषु च पादोनकल्पनं ब्रह्महत्यासमेषु तद्व

तातिदेशेषु च क्रमेणार्धपादोनं च कल्पनीयं तथाहि समत्वेऽभिहिते पश्चात्प्रायश्चित्तमतिदेशेन प्राप्नोती

ति द्वितीयकल्पायां प्रायश्चित्तप्राप्तिः साक्षाद्व्रतातिदेशेषु प्रथमकल्पायामेव व्रतप्राप्तिरिति साक्षाद्

दर्शनात् अत्रापि जातस्य स्त्रियो वयोवस्थाद्यपेक्षया द्वादशवार्षिकादीनि यथायोग्यं

माब्राह्मणः राजसमौ मैत्रोत्पादितस्त्रसमशाङ्गस्य किंचिन्न्यूनेन प्रयोगं योज्यानि अथ ब्रह्महत्याव्रतातिदेशः याज्ञवल्क्यः यागस्थ
क्षत्रविट्घाती चरेद्ब्रह्महणो व्रतं गर्भहा च यथावर्णं तथात्रेयीनिषूदकः यागोत्र सोमयागः यः क्षत्रं निधाय स्थान्यायुधा
नि ब्राह्मणो वा युद्धे ब्राह्मणो रूपेण ब्रह्मन्स्त्वा यजमानमुपवर्त्तते इति श्रुत्या सोमयागं प्रति क्षत्रियस्य सोमयागकर्त्तृब्राह्म
णत्वाभिधानात् वसिष्ठोपि सवनगतौ राजन्यवैश्याविति सवनसंपाद्य सोमयागमेव निर्दिशति दीक्षणीयायाद्यूर्ध्व
मवभृथात्प्राक् सोमयागे वर्त्तमानयोः क्षत्रियवैश्ययोर्हननेन ब्रह्महत्याव्रतं चरेत् यद्यपि न्यायतः किंचिन्न्यूनं प्रायश्चि
त्तं प्राप्नमिति दिष्टत्वात् तथापि संपूर्णमेव प्रायश्चित्तं कर्त्तव्यं अप्रायत्तस्वेतत्पूर्वयोर्वर्णयोर्वेदाध्यायिनो हत्वेत्युपक्रम्य सव
नस्थक्षत्रियादिद्वये द्वादशवार्षिकविधानात् पूर्वयोर्वर्णयोः क्षत्रियवैश्ययोरिति तद्धाष्ये अत्रापि ज्ञानाद्यपेक्षया
न्यूनाधिककल्पनायोज्या गर्भहा च यथावर्णमित्यादि विवाहिताद्वर्णसंभूतं स्त्रीपुंव्यंजकैरनभिव्यक्तं गर्भं हत्वा य
द्वर्णाकृष्ट वधे यत्प्रायश्चित्तं तद्वर्णगर्भवधे तत्प्रायश्चित्तं चरेत् तथा यद्वर्णात्रेयीवधस्तद्वर्णप्रायश्चित्तं कुर्यात् त
था च मनुः हत्वा गर्भमविज्ञातमिति स्त्रीपुंनपुंसकव्यक्तिविशेषज्ञाने तु यथालिंगं प्रायश्चित्तं कुर्यात् अंगिराः आ

तामिशंसनमित्युक्तं तथापिप्रायश्चित्तस्यमहत्वादन्तनामिशंसनेपिमहत्वंकल्पनीयं आपस्तम्बः दोषवुद्धानपूर्वेःप
देषांसमाख्यातास्यादिति अत्रप्रथमत्वपदंदोषकथनेनिमित्तमिति प्रथमंमिथ्यागुरुविषयेमिथ्याभिशंसकस्यब्र
ह्महत्यासमंप्रायश्चित्तंसक्रुद्धः मित्रस्यब्राह्मणस्यापिवधः अधीतस्यचनाशनंअधीतस्यवेदस्यासच्छास्त्रविनोदना
लस्यादिनाशनम् विस्मरणं यच्चस्वाध्यायत्यागस्योपातकमध्येपरिगणनंस्वाध्यायाभिस्तत्यागइतितत्सच्छास्त्राभ्यास
निष्ठत्वेनकुटुम्बपोषणव्यग्रतयावापरित्यागेद्रष्टव्यं यत्तुमनुनासुरापानसमत्वमुक्तं ब्रह्मोज्झतावेदनिंदाकूटसाक्ष्यं
सुहृद्वधः आहितान्नाद्ययोर्जग्धिःसुरापानसमानिषट् इतितत्प्रायश्चित्तविकल्पार्थं एवमन्यत्रापि... तथाश्र
न्ततंचसमुत्कर्षेराजगामिचपैशुन्यं गुरोश्चालीकनिर्बंधःसमानिब्रह्महत्यया राजकुलादिष्व... चतुर्वेदा
भिन्नइत्यभिभाषणादिसमुत्कर्षे न्ततं यत्रगुणावज्ञायांसत्यांपरीक्षकोजानन्नपिसमुत्कर्षविधि... दोसो
पिब्रह्महत्यासमंप्राप्नोति विष्णुःशरणागतहननंब्रह्महत्यासममिति प्रचेताः गोगर्भिणीबाल...
मानमिति एवमन्यान्यपिवचनानिगवेषणीयानि अत्रसमत्वाभिधानात् शिष्टाचारवलेनपं...

वधोब्रह्महत्यासमः

दोनंकल्पस्मृति
स१

कालंदेशाहन्याद्युगपत्सुरनन्दननिमित्तमेकमाश्रित्यहंतिनैकेनवापिभोः ब्राह्मणंब्राह्मणोवीरब्राह्मणान्सुबहू
नपिनिहंत्ययुगपद्वीरएवंप्रमाणांतिकंचरेत् किंत्वत्रसुरषांम्लविशेषंगतः शृणु बुद्धिपूर्वेऽबुद्धिपूर्वेवि
कल्पेशृणुपुत्रक अकामतोयदाहन्याद्ब्राह्मणान्मानवोगुह चरेद्व्रतमहाचोरयावत्प्राणपरित्ययम् का
मतस्त्वयदाहन्याद्ब्राह्मणान्सुरसत्तम तदात्मानंदहेदग्नौविधिनायेनतंशृणु भूत्वानिष्कालकोवीरवेष्टयि
त्वाम्बुवाससा घृताक्तेनमहाबाहोदत्वासर्वस्वमेवहि हित्वापादौकरीषाग्नौदहेदात्मानमात्मना उत्तमांगाद्वि
धिवद्दत्वस्यान्सुरसत्तम एवमत्रमहाबाहोनिर्दोषःपरिकीर्तितः निष्कालकःकालोत्तरनपेत्त इतिस्मृ
तिमंजर्यां निर्गतकालक्रमंवर्णात्मकंकेशादियस्मात् सनिष्कालइत्यपराकीर्दो अथब्रह्महत्यासमानां
प्रायश्चित्तंतत्स्वरूपंचाभिधीयते याज्ञवल्क्यः गुरूणामध्यधिक्षेपोवेदनिन्दासुहृद्वधः ब्रह्महत्यासमंज्ञेय
मधीतस्यचनाशनं गुरूणामध्यधिक्षेपःपित्रादिगुरूणामुपर्युपर्याक्षेपः अनृतेननलोकाविदितपत
नीयपापशंसनं तथाचगौतमः गुरोरनृतनाभिशंसनमितिपातकसमानीति अत्रयद्यपिसामान्येनानृ

रात्रोपोषितो द्विज इति एवमन्यान्यपि स्मृत्युक्तानि प्रायश्चित्तानि न्यूनाधिकानि जातिशक्त्याद्यपेक्षया योजनीया
नि मूर्धावसिक्तस्य ब्राह्मणवधे ब्राह्मणादधिकं अनेनैव दिशा इतरानुलोमजानां स्वसन्निहितोत्तमापेक्षयाधि
कं स्वसन्निहितनीचापेक्षया न्यूनमित्येवं परिकल्पनीयं यस्तु सोमयागं कुर्वन्तं ब्राह्मणं व्यापादयति तस्य पर्ष
द्या ब्राह्मणानां तु सा राज्ञो द्विगुणा भवेदिति त्यनेन न्यायेन यत्प्रायश्चित्तं प्राप्तं तद्द्विगुणं भवति तथा च याज्ञवल्क्यः
द्विगुणं सवनस्थे तु ब्राह्मणे व्रतमादिशेदिति सवनसम्पाद्यः सोमयागः सवनशब्देनोच्यते तत्रस्थः सवना
स्थः सोमयागं कुर्वाण इत्यर्थः यच्च भविष्यत्पुराणवचनं ब्राह्मणं यजमानं च हत्वा निष्कृतिमाचरेत् चरित्वा
द्वादशाब्दानि सेतुबंधं च स्पृशपतिइति एतच्च गुर्वाचार्यादिरूपसोमयागकर्तृविषयं यतस्तत्रैव निहत्यस्त्व
रशां मूलहंतुर्वै ब्राह्मणस्य तु अथवा गुरुविषयं प्रायश्चित्तमिदं गुरुवचनादेव शान्मूलपृष्ठतस्ते ब्रवी
म्यहम् अस्तु प्रक्रमस्य ब्राह्मणं जलयजमानं चेति परिपठितं अत्र द्वादशाब्दानीति बहुवचनेन कपिंजलन्याये
न त्रित्वं पर्यवसितम् युगपत्कामतः अकामतो वा अनेकब्राह्मणवधे भविष्यत्पुराणे विशेषोभिहितः एक

वानग्निवर्जितः प्रायश्चित्तं तस्य कुर्यादिदं पापविशुद्धये धनं वा जीवनायालं गृहे वासः परिच्छदम् यद्वा पराशरेस्तेन स्मृ।
ष्यति पराशरोक्तं प्रायश्चित्तं यथा चतुर्विधोपपन्नस्तु विधिवद्ब्रह्मघातके समुद्रसेतुगमनं प्रायश्चित्तं विनिर्दिशेत् से
तुबंधपथे भिक्षाचतुर्वर्णं समाचरेत् वर्जयित्वा विकर्मस्थांश्छत्रोपानद्विवर्जितः अहं दुष्कृतकर्मा वै महापातककार
कः वैश्मद्वारेषु तिष्ठामि भिक्षार्थी ब्रह्मघातिकः गोकुलेषु च गोष्ठेषु ग्रामेषु नगरेषु तपोवनेषु तीर्थेषु नदीप्रस्र
वणेषु च एतेषु ख्यापयन्नेनः पुण्यं गत्वा तु सागरम् ब्रह्महापि प्रमुच्येत स्नात्वा तत्र महोदेयो ततः पूतो गृहं गृहा
प्राप्य कृत्वा ब्राह्मणभोजनम् दत्त्वा च सुपवित्राणि पूतात्मा प्रविशेद्गृहं विंध्याडुत्तरतोयस्य निवासः परिकीर्तितः
पराशरमतं तस्य सेतुबंधस्य दर्शनमिति मनसा ब्रह्महननमध्यवस्य यदा स्वत एव जिघांसया उपरतस्तदा व।
सिष्ठोक्तं द्वादशरात्रद्वयं द्वादशरात्रमः भक्तो द्वादशरात्रमुपवसेदिति निर्गुणस्य हंतुः प्रत्यानेय गुरुत्वष एव ब्रा
ह्मणस्य ज्ञानवधे षट्त्रिंशन्मतोक्तं षडब्दं ब्राह्मणो हत्वा शूद्र हत्वा व्रतं चरेदिति चान्द्रायणं वा कुर्वीत परावह्नय
मेव चेति अनेवज्ञानपूर्वके बृहस्पतिः अरुणायाः सरस्वत्याः संगमे लोकविश्रुते। शुद्ध्येत्त्रिषवणस्नायी त्रि

तार्यत्वस्यभावमापन्नइतिजानतां इच्छया आत्मनोरज्जादेवत्वप्रेरितः तद्व्यस्यव्यतिरिक्तस्यापिभृगुपतनेमरणाति
कप्रायश्चित्तंभवत्येव यदाहयमः यःकामतोमहापापंनरःकुर्यात्कथंचन नतस्यशुद्धिर्निर्दिष्टाभृग्वग्निपतना
द्दतेइति अग्निपतनस्यतद्व्यविषयत्वात् भृगुपतनमितरविषयं मरणांतिकाशक्तस्यपर्षद्याब्राह्मणानामि
त्यनेनप्रकारेणवर्णायेत्तयोक्तप्रायश्चित्तंद्विगुणंभवति अत्यंतगुणवतानिर्धनेनविडद्याहंत्राप्रमादान्निर्गुणोवा
पादिष्टेयदकल्मरहितमंत्रब्राह्मणात्मकवेदस्यारणेपत्रिःनियताहारस्त्रिवेकंपठेत्सशुद्धिः एवोक्तविषयएवहंता
यद्दिवे[illegible]हितसदासरस्वतीप्रतिस्रोतोजपेति भविष्यत्पुराणे हंतायदावेदहीनोधनेनचभवेत्तुह तदेतत्कल्पयेत्त
त्प्रायश्चित्तंनिबोधमे हविष्यभुग्वानुसरेत्प्रतिस्रोतःसरस्वतीम् धनवतोनिर्गुणस्यहंतुर्निर्गुणहननेमनुः
सर्वस्वंवावेदविदेब्राह्मणायोपपादयेत् धनंवाजीवनायालंगृहंवासःपरिच्छदं जीवनपर्याप्तधनदाशक्तः
सोपस्करंगृहंदद्यात् सर्वस्वपरिमाणमाहांगिराःसाशीतिपणसाहस्राहृर्धसर्वाणमुच्यते निर्धनोब्रह्महाशु
द्ध्यत्वलोधिकासान्तरेश्वर भविष्यत्पुराणे जातमात्रेयदाहन्याद्ब्राह्मणंब्राह्मणोगुह वेदाभ्यासविहीनोवेधन

हविरपिलोमादीनि ननुपक्वमेव हि हविस्त्वं देवतात्वं च कथमिति चेत् मैवं लोमादीनि द्रव्याणि हवींषि देवतातत्तत्सम्बद्धसम
वायिनीति द्रव्यदेवतयोरस्त्येव भेदः यदा त्ववासिष्टमंत्राद्धोमे गृह्यते तद्धितेन चतुर्थ्या वा मंत्रवर्णेन दृश्यते देवतास्माति
स्तत्रदुर्बलत्वपरंपरमिति हविरपिलोमादीनि ननुपक्वस्येव हविस्त्वं देवतात्वं च कथमिति चेत् मैवं लोमादीनि द्रव्या
णि हवींषि देवतातत्तत्सम्बद्धसमवायिनीति द्रव्यदेवतयोरस्त्येव भेदः यदा त्ववासिष्टमंत्राद्धोमे गृह्यते तद्धितचतुर्थ्या
भावात् मंत्रवर्णेन देवतात्वम्पा तत्र लोमादिहविषां मृत्युसंबंधावगमात् मंत्रप्रकाश्यमृत्योर्देवतात्वमिति नवि
रोधः अयं च होमो लौकिकाग्निप्रतिष्ठाप्य तत्र कर्त्तव्यः पतिताग्नीनां प्रतियत्यंतरविधानात् शरीरप्रक्षेपे वि
शेषमाह मनुः प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः कात्यकश्रुतिः अनशनेनकार्शितोग्निमारोहेदिति इ
वैद्युः कृतोपवासः कुर्यादित्यर्थः भविष्यपुराणे हत्वा तु क्षत्रियो विप्रं गुणाढ्यमिह कामतः प्रायश्चित्तं च
रेद्धीर विधिवत्कायशुद्धये लक्ष्यं शस्त्रभृतां वा स्यात् विदुषामिच्छयात्मनः प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शि
राः यजेत वाश्वमेधेन क्षत्रियो विप्रघातकः प्रायश्चित्तं त्रयं ह्येवं क्षत्रियस्य प्रकीर्तितमिति विदुषां प्रायश्चि

तद्वसिष्ठवचनस्याग्रभागे यदित्युच्यते तथा च वसिष्ठ इत्युपक्रम्य भ्रूणहाग्निमद्यममाधाय जुहुयाल्लोमानि मृत्यो
र्जुहोमि लोमभिर्मृत्युंवाशय इति प्रथमां त्वचंमृत्योर्जुहोमि त्वचा मृत्युंवाशय इति द्वितीयां लोहितंमृत्योर्जु
होमि लोहितेनमृत्युंवाशय इति तृतीयां मांसानि मृत्योर्जुहोमि मांसैर्मृत्युंवाशय इति चतुर्थी मेदो मृत्योर्जु
होमि मेदसा मृत्युंवाशय इति पंचमी स्नावानि मृत्योर्जुहोमि स्नावभिर्मृत्युंवाशय इति षष्ठी अस्थीनि मृत्योर्जु
होमि अस्थिभिर्मृत्युंवाशय इति सप्तमी अत्र च लोमप्रभृतितत्त्वं जुहुयादिति लोमादीनां होमद्रव्यत्वावगमात्र लोमादी
नां देवतात्वं कल्प्यते अर्थप्रकाशनेनैव मंत्राणां होमसाधनोपयत्नः किंतु लोमभिर्मृत्युंवाशय इत्यादि वसिष्ठमंत्रवर्णा
लोचनया मृत्योरेव हविःसंबंधावगमाद्देवतात्वं कल्प्यते अर्थप्रकाशनेनैव मंत्राणां होमसाधनोपयत्नः अत्र निबंध
कारयोः परस्परविरोधः प्रतीयते स विरोध इत्थं परिहरणीयः प्रायश्चित्तरूप लोमादिहोमो वाजसनेयीयेष्वपि मंत्रा
वामिष्टेन्ये अतो मंत्राणामेककार्यविधानाद्विकल्पः तत्र वाजसनेयीयमंत्रग्रहणे मंत्रेषु चतुर्थ्यन्तनिर्देशात् लोमादी
नामेव देवतात्वं तथा च भट्टवार्तिकं तद्धितेन चतुर्थ्या वा मंत्रवर्णेन चेष्यते देवतासंगतिस्तत्र दुर्बलं तु परंपरमिति

मिदेवानांनरदेवसमागमे स्नमेनोवभृथंस्नात्वाहयमध्येनशुध्यति अत्रभूमिदेवाऋत्विजः अभिषिक्तात्क्षत्रियोय
जमानोनरदेवः तेषामन्योन्यसमागमेस्वमेनः प्रख्यापयित्वावभृथंगत्वातत्रस्नात्वाशुद्धोभवतीत्यर्थः दीर्घ
तीव्रा[illegible]यग्रस्तंब्राह्मणंगामथापिवादृष्ट्वापथ्यनिरातंकंकृत्वावाब्रह्महाशुचिः पूर्वोक्तगुणविशिष्टंब्राह्म
णंगांवापथिदृष्ट्वातंनीरुजंकृत्वापक्रीतब्रह्महत्याप्रायश्चित्तोंनराःशुद्धोभवतीत्यर्थः एतच्चद्वादशवार्षि
कमकामविषयम् क्षत्रियस्यकामकारविषयेतुयाज्ञवल्क्यः लोमभ्यःस्वाहेत्येवंहिलोमप्रभृतिवैतनुम्
मज्जांतंजुहुयाद्वापिमंत्रैरेभिर्यथाक्रमं मंत्रास्तुवाजसनेयकेपरिपठिताः लोमभ्यःस्वाहा त्वचेस्वाहा
लोहितायस्वाहा मांसायस्वाहा मेदसे अस्थिभ्यः मज्जाभ्यःस्वाहा एतैर्मंत्रैर्यथाक्रमंकृत्वा अंतेस्व
शरीरंक्षत्रियश्छित्वाजुहुयात् अत्रलोमादीनांमंत्रसामर्थ्याद्देवतात्वे तेषामेवचलोमप्रभृतिवै तनुं
जुहुयादितिवचनसामर्थ्याद्वह्निस्त्वमपीत्यपरार्के मिताक्षरायांतु भ्रूणहननेवक्ष्यामोब्राह्मणंहत्वा
भ्रूणहाभवति अविज्ञातंगर्भंच अविज्ञाताहिगर्भाः पुमांसोभवंति तस्मात्पुंस्कृत्यजुह्वतेइमे

णोतथा पादोबालेषुदातव्यः सर्ववर्णेष्वयंविधिरिति एवंचयानिशंखादिवचनानिबालांतरस्यप्रायश्चित्ता
भावप्रतिपादकानितानि प्रासंगिकंमभिहितंप्रकृतमनुसरामः एवंपूर्वोक्तप्रकारेणयोब्रह्महत्यादिव्रतंद्वा
दशवार्षिकंकुर्वन् व्रतसमाप्तेःपूर्वमेवचोरव्याघ्रादिभिर्हन्यमानंब्राह्मणंमोचयतिस्वशरीरमंतराकृत्वा
मोचयितुंप्रवृत्तस्सन् तत्प्राणत्राणमंतरेणापिस्वयंम्रियतेतदाशुद्धोभवेत् द्वादशसंख्याकगोरक्षणादपि
तथापर[illegible]श्वमेधावभृथस्नानकालेवक्ष्यमाणरीत्यास्नात्वाब्रह्महत्यायाः शुद्धिमवाप्नोति तथाचा
पोतः द्वादशवर्षैःशुद्धिंप्राप्नोति अंतराब्राह्मणंमोचयित्वा गवांवाद्वादशानांपरित्राणात्सद्यएवाश्वमेधा
वभृथस्नानाद्वापूतोभवतीति मनुः ब्राह्मणार्थेगवार्थेवासद्यःप्राणान्परित्यजेत् मुच्यतेब्रह्महत्या
यागोप्तागोर्ब्राह्मणस्यच गोप्त्रेति अत्रसद्यःप्राणान्परित्यजेदित्यनेनब्राह्मणार्थेमरणंगो[illegible]गोब्रा
ह्मणस्यचेत्यनेनतद्रक्षणंचपृथगुपात्तः अतःस्वयंजीवंस्त्राणेकृतेपिशुद्धः स्वमकृत्वे[illegible]स्वशक्त्यनुसा
रेणतदर्थंप्रवृत्तःसन्यदिमृतस्तदापिशुद्धइतिमन्यते अवभृथस्नानेसएवविशेषमाह शाल्वावाभृ

देनततः दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव वा पितृद्रव्येति पितृद्रव्याविनाशेन यत्तच्च मैत्रादिषु सर्वत्रा
नुषज्यते मैत्रं मित्रसकाशाल्लब्धं पितृक्रमायातमन्यैरपहृतं पित्रादिना सामर्थ्याभावादनुद्धृतं यत्
किंचिद्द्रव्यं पुत्रादीनां दायाहीणां मध्ये य इतरैस्त्वमेव साधयेदनुज्ञातः सनुद्धृत्यापहर्तृभ्यः सदाया
देभ्यः तद्धनेन दद्यात् स्वयमेवोद्धर्ता गृह्णीयात् अन्यापहृतेनोद्धृते दत्ते क्षेत्रे तु विशेषमाह शंखः भू
वे नष्टां तु यो भूमिमेकश्चेदुद्धरेत्क्रमात् यथाभागं लभंतेन्ये दत्वांशं तु तुरीयकम् चतुर्थभागमुद्धर्त्रे
दत्वावशिष्टं तु वस्तूद्धर्तृसहिताः सर्वे विभज्य गृह्णीयुः अध्यापनवेदार्थव्याख्यानविचाराध्य
यनादिलब्धं पितृद्रव्येति कथानात् पितृद्रव्याविनाशेन लब्धं मैत्रादि विद्यालब्धात्तु नानामेव पितृ
द्रव्याविरोधेनेत्येतद्विशेषणं अतः पितृद्रव्याविरोधेनापि प्रतिग्रहे लब्धं विभजनीयमेव तथाच
शिष्या वा रोहयत्यते कुटुंबं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः भागं विद्याधनात्तस्मात्स लभेताश्रुतो
पि सन् कात्यायनः परभक्तोपयोगेन विद्याप्राप्तान्यतस्तु या तथा लब्धं धनं यत्तु विद्याप्राप्तं तदुच्य
ते मनुः अनुपघ्नन्पितृद्रव्यं श्रमेण यदुपार्जितम् दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव

च श्रमेणसेवायुद्धादिना तथावस्त्रंपत्रमलंकारंकृतान्नमुदकंस्त्रियः योगक्षेमंप्रचारंचनाभिभाज्यंप्रचक्षते
वस्त्राणामविभाज्यत्वंधृतानामेव पत्रंवाहनम् अश्वशिविकादि तदपियद्यस्यनियमेनारोहणसाध
नंतदविभाज्यं अथवापत्रमाद्रीत्रलेख्यनिविष्टधनपत्रः तथाचबृहस्पतिः करणमुद्धारस्यलिखितमि
ति उद्धास्यदत्वा अत्राविभाज्यत्वमित्यनुवर्तते कात्यायनः धनंपत्रनिविष्टमिति अत्रायमभिप्रायः
यावत्पत्रेनिविष्टंनोद्ध्रियतेतावदविभाज्यमिति अथवाबृहस्पत्युक्तप्रकारोविज्ञेयः असत्याविभजनी
यत्तदन्यथानर्थकंभवेत् विक्रीयवस्त्राभरणंऋणमुद्धार्यलेखितम् कृतान्नंचाकृतान्नेनपरिवर्त्यवि
भज्यतेइति अश्वादिवाहुल्येतद्विक्रयोपजीविनाविभाज्यमेव यदाजाविकादिविषमत्वेनाविभाज्य
तज्ज्येष्ठस्य तथाचमनुः अजाविकंसैकशफंनजातुविषमंभजेत् अजाविकंसैकशफंज्येष्ठस्यैव
विधीयते अलंकारोपियोयेनधृतःसोविभाज्यः मनुः पत्यौजीवतियःस्त्रीभिरलंकारोधृतोभवे
त् नतंभजेरन्दायादाभजमानापतंतिते अवरुद्धकलत्रेष्वपियोयेनधृतः सोविभाज्यः यथाहगौ
तमः स्त्रीषुचसंयुक्तास्वविभागइति संयुक्तास्ववरुद्धासु योगक्षेमं अलब्धस्यलाभोयोगः अल

पा.
९८

नविद्यते सधर्मेकर्मणीतद्भवश्यकर्मणीसर्ववर्णसाधारणोस्त्ययमर्थः एवमापदं निस्तीर्य प्रायश्चित्तं कृत्वा स्वमार्गनिरतो
भवेत् तथा च याज्ञवल्क्यः निस्तीर्यतामथात्मानं पावयित्वा प्रायश्चित्तैः पथिस्ववर्णधर्मे स्ववर्णधर्मे स्ववर्णधर्मेनिर
तानां फलमाह पैठीनसिः ब्राह्मणस्य प्राजापत्यं ऐन्द्रं यदं क्षत्रियस्य मारुतं वैश्यस्य गांधर्वं शूद्रस्य स्थानं व्रजंति ते स्वस्वक
र्मण्यभिरता स्वयइति अथ प्रासंगिकं परिसमाप्य प्रकृतमनुसरामः तत्र प्रथमं स्नानविधिः तत्रादौ तावत्प्ररोचनार्थं स्ना
नप्रशंसा योगयाज्ञवल्क्यः अगम्यागमनात्स्तेयात्पापेभ्यश्च प्रतिग्रहात् रहस्याचरितात्पापान्मुच्यते स्नानमाचर
न् मनःप्रसादजननं रूपसौभाग्यवर्धनम् शोकदुःखमहं स्नानं मोक्षदं ह्लादनं तथा स्नानभेदानाह शंखः ॥
स्नानं तु द्विविधं प्रोक्तं गौणमुख्यप्रभेदतः तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधं भवेत् नित्यं नैमित्तिकं काम्यं क्रियांगम
लकर्षणं क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्तितं एतल्लक्षणान्यपि स एवाह अस्नातस्तु पुमान्नार्हो जप्याग्निहु
वनादिषु प्रातःस्नानं तदर्थं तु नित्यस्नानं प्रकीर्तितम् प्रातरित्युपलक्षणं अतो माध्यंदिनस्यापि नित्यत्वमेव ॥
तथा च माधवीये नाह गोवलिः नित्यमतन्निर्वर्त्यमिति वैयाघ्रपादोपि प्रातःस्नानी भवेन्नित्यं मध्यस्नानं सदा भ
वेदिति चंडालशावशूद्रादिस्पृष्टस्नातां रजस्वलाम् स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तिकं हि तत् पुष्यस्नादि

९२ वाय्यप्राप्नोजीवन्कारुकर्मभिः येः कर्मभिः प्रचरितैः शुश्रूष्यंते द्विजातयः तानि कारुककर्माणि शिल्पानि विविधानि
च कुर्वीतेति येस्य ऋाप य पीन वहन्निभ्योपि स्वहन्निरेव ब्राह्मणस्य ज्यायसीत्याह मनुरेव वरं स्वधर्मो विगुणः परधर्मा
त्स्वनुष्ठितात् परधर्मेण जीवन्हि सद्यः पतति जातितः वैश्यवृत्तिमनातिष्ठन्ब्राह्मणः स्वेपथि स्थितः अवृत्तिः कर्षि। त
तः सीदन्निमं धर्मं समाचरेत् सर्वतः प्रतिगृह्णीयात् ब्राह्मणस्त्वनयं गतः नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रति।
ग्रहात् दोषो भवति विप्राणां ज्वलनांबुसमा हि ते तथा जीवितात्ययमापन्नो योन्नमत्ति यतस्ततः आकाशमिव पंके
न स पापेन लिप्यते तथार्थवादोपि अर्थार्थस्वात्मभ्यागाद्विश्वामित्रः श्वजाघनीम् चंडालहस्तादादाय धर्माधर्म
विचक्षणः श्वजाघनीं श्वांत्राणि आपाद्यसंतापसात्राच वमपकस्य कर्मणः तमस्तस्यैर्थचोरमपि कविनानुजानाति वा।
नमांसं मूलफलं दार्वन्नार्थं तथैव च तृणं च गोभ्यो ग्रासार्थमस्तेयं मनुरब्रवीत् वानवस्पत्यं पत्रपुष्पादि द्विजोध्वगः क्षी
णवृत्तिर्द्वाविक्षू द्वे च मूलके आददानः परक्षेत्रान्न दंडं दातुमर्हति तथैव सप्तमे भक्ते भक्तानि षडनश्नता अश्वस्तनवि
धानेन हर्तव्यं हीनकर्मणः ब्राह्मणव्यतिरिक्तास्य श्रोत्रियो हीनकर्मेत्यभिधीयते उत्कृष्टं चापकृष्टं च तयोः कर्म।
न विद्यते मध्यमे कर्मणी हित्वा सर्वसाधारणे हि ते तयोर्ब्राह्मणशूद्रयोः उत्कृष्टं ब्राह्मणकर्म अपकृष्टं शूद्रकर्म

तत्र मनुः अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्मणा जीवेत्क्षत्रियधर्मेण स ह्यस्य प्रत्यनन्तरः उभाभ्यामप्यजीवंस्तु कथं स्यादि
ति चेद्भवेत् कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकाम् वैश्यवृत्त्यापि जीवतो विक्रीयमाह स एव च सर्वान्रसानपो
हेत कृतान्नं च तिलैः सह [illegible] व्यपोहेतेति सर्वत्रानुषज्यते अश्मनो लवणं चैव पशवो ये च मानुषाः
सर्वं च तान्तवं रक्तं शाणक्षौमाविकानि च अपि चेत्स्युररक्तानि फलमूले तथौषधीः अपः शस्त्रं विषं मांसं सोमं गं
धांश्च सर्वशः क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान् आरण्यांश्च पशून्सर्वान्दंष्ट्रिणश्च वयांसि च मद्यं नीलीं च लाक्षां
च सर्वांश्चैकशफांस्तथा अत्र रसग्रहणेनैव लवणस्यापि ग्रहणे सिद्धे पुनर्ग्रहणं दोषाधिक्यप्रतिपादनार्थं एतेनान्य
दपि पुनरुक्तं व्याख्यातं क्षौद्रं मधु अकल्कः सिल्हकं माक्षिकस्य मधुशब्देनैवोपादानम् सद्यः पतति मांसेन लाक्षया।
लवणेन च त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात् इतरेषां तु पण्यानां विक्रयादिह कामतः ब्राह्मणः सप्तरात्रे
ण वैश्यभावं नियच्छति रसा रसैर्निमातव्या न त्वेव लवणं रसैः कृतान्नं चाकृतान्नेन तिलधान्येन तत्समः निमातः
व्याः परिवर्तनीयाः जीवेदेतेन राजन्यः सर्वेणाप्यनयं गतः न त्वेव ज्यायसीं वृत्तिमभिमन्येत कर्हिचित् एतेनश्र्वो
क्तेन अनयमापन्न वैश्यो जीवन्स्वधर्मेण शूद्रवृत्त्यापि वर्तयेत् अशक्नुवंस्तु शुश्रूषां शूद्रः कर्तुं द्विजन्मनाम् पुत्रदा

34 X 15
100r

सर्वेषामपि चैतेषां ऊसीदमथिकं विडः अनाहृष्टा राजभयात् दृषकायैरुपद्रवैः कृष्यादिके अवेङ्गानिस्मात्तसीदेन विप्रा
ते अथ शूद्रवृत्तिः तत्र मनुः विप्राणां वेदविदुषां गृहस्थानां यशस्विनां शुश्रूषैव तु शूद्रस्य धर्मो नैःश्रेयसः परः बृहस्पतिः
शौचं ब्राह्मणशुश्रूषा प्रथमं धर्मलक्षणं यदन्यत्कुरुते किंचित्तद्भवेत्तस्य निष्फलम् द्विजशुश्रूषा त्रिवर्णशुश्रूषा तस्य नि
ष्फलमिति द्विजसेवायाविरोधि यदन्यत्कुरुते तन्निरर्थकमित्यर्थः गौतमः चतुर्थो वर्णः एकजातिः तस्यापि सत्यम
क्रोधः शौचमाचमनार्थे पाणिपादप्रक्षालनमेके श्राद्धकर्म भृत्यभरणं स्वदारवृत्तिः परिचर्या चोत्तरेषामेभ्यो वृत्तिं लिप्सेत इ
तरेषां द्विजातीनां याज्ञवल्क्यः भार्यारतिः शुचिर्भृत्यभर्ता श्राद्धक्रियारतः नमस्कारेण मंत्रेण पंचयज्ञान्न हापयेत् न
मइत्येतावता वानेव मंत्रः देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च नमः स्वधायै स्वाहायै नित्यमेव नमो नम इति वा मंत्रः
न त्वन्ये शूद्रस्य कथमग्निसाध्यकर्माधिकारः विवाहाग्नाविति चेन्न शूद्रस्य विवाहहोमाभावात् न ह्यमंत्रकोऽस्ति हो
मः न च शूद्रो मंत्रवान् न च नमस्कारमंत्रेणैव मंत्रवत्त्वमिति वाच्यं तस्य पंचयज्ञेष्वेव विहितत्वात् तस्मादग्निसाध्यकर्माणि
कार्याणीति प्रतिमा द्वाहिंपायात निषादस्थपतीष्टिवत् किंच द्विजातीनामपि न विवाहाग्नौ नियमेन वैश्वदेवकर्म किमुत
शूद्रस्य एवं च शूद्रस्य यत्र यत्र होमविधिस्तत्र लौकिकाग्नावेव मंत्रांतराविधानं च नमस्कारमंत्र एवेति सिद्धं अथापद्वृत्तिः